THE WORKS
OF
Sri Sankaracharya
SRI
VANI VILAS
EDITION.

THE WORKS OF
SRI SANKARACHARYA
VOLUME
20
SRI VANI VILAS PRESS
SRIRANGAM

॥ विषयाः ॥

Prapanchasara
VOL. II.

॥ प्रपञ्चसारः ॥
द्वितीयो भागः ॥

॥ श्रीः ॥

॥ प्रपञ्चसारविषयविवेकः ॥

पृष्ठम्

ॐ

Gourishunker Ganeriwala.

॥ प्रपञ्चसारः ॥

विंशः पटलः ॥

अथ प्रवक्ष्यामि च मासभेद-
भिन्नानि यन्त्राण्यपि संग्रहेण ।
रेखाक्रमद्युन्ति विचित्रवर्ण-
लसन्ति विष्णोश्च विधानभाञ्जि ॥ १ ॥

यैः कुर्युरिष्टाप्तिनिविष्टचेष्टा
धरण्यनन्तादिकसंज्ञकानि ।
व्रतान्यभीष्टार्थदकल्पवृक्षै-
रनारतेनैव च साधकेशाः ॥ २ ॥

मेषादिकं यच्च चतुष्कमादौ
मासेषु तद्वायुगृहावृतं स्यात् ।
सिंहादिकं भूगृहसंवृतं च
चापादिकं पार्थिवयुग्मवीतम् ॥ ३ ॥

मेषादिकेषु त्रिगुणात्मकानि
चराणि भास्वद्गुणितात्मकानि ।
स्थिराण्यतो षड्गुणितानि तज्ज्ञै-
रुक्तानि यन्त्राण्युभयात्मकानि ॥ ४ ॥

तानि त्रिषड्द्वादशकात्मकोक्तैः
स्युर्लक्षणैरप्यभिलक्षितानि ।
स्वैः स्वैश्च नामप्रविभक्तरूप-
भेदैर्बहिर्वेष्टितबिम्बकानि ॥ ५ ॥

त्रिगुणितमपि यन्त्रमष्टपत्रा-
वृतमथ [1]षड्गुणितं हि षड्दलाभ्याम् ।
स्थिरगतमपि चाष्टयुग्मपत्रं
तदपि च षड्युगपत्रशोभितं वा ॥ ६ ॥

1. षड्गुणितद्विषड्दलाभ्याम्.

पद्मं चरोभस्थिरसंज्ञकेषु
  रक्तप्रपीताच्छदलादिवर्णम् ।
मासेषु यन्त्रोदरक्लृप्ततत्त-
  न्मासाभिधामूर्त्यभिधाक्षराढ्यम् ॥ ७ ॥

केशवमेषादीनां
  ये दीर्घा मुक्तिराशिवर्णानाम् ।
ते वृत्तानि भवन्ति च
  निगदितमिति यन्त्रक्लृप्तिसामान्यम् ॥ ८ ॥

सुवर्णगोक्षीरजपाशिलाल-
  पीतेन्द्रनीलारुणकैरवाभाः ।
काश्मीरमेघाञ्जनरोचिषश्च
  क्रमेण वर्णैरपि केशवाद्याः ॥ ९ ॥

इतीरिताश्चारुकिरीटहार-
  केयूरपीताम्बरकादितुल्याः ।
सचक्रशङ्खाः सगदाम्बुजाश्च
  संपूजनीयास्तपनैः क्रमेण ॥ १० ॥

धात्रर्यममित्राख्या
वरुणांशभगा विवस्वदिन्दुयुताः ।
पूषाह्वयपर्जन्यौ
त्वष्टा विष्णुश्च भानवः प्रोक्ताः ॥ ११ ॥

प्रथमं केशवधातृक-
मितरन्नारायणार्यमाख्यं च ।
अन्या माधवमैत्रं
परमपि गोविन्दवारुणं प्रोक्तम् ॥ १२ ॥

पञ्चममपि विष्ण्वंशं
मधुसूदनभगवपञ्च षष्ठमपि ।
त्रिविक्रमविवस्वदाख्यं
सप्तममन्यच्च वामनैन्द्रमपि ॥ १३ ॥

श्रीधरपौष्णं नवमं
दशमं च हृषीकनाथपर्जन्यम् ।
अम्बुजनाभं त्वाष्ट्रं
दामोदरवैष्णवं विधानमिति ॥ १४ ॥

आदौ विधानेषु समेतमूर्ति-
शक्तीश्चतस्रोऽभियजेद्यथावत् ।
राशिष्वथो भानुयुताश्च मूर्तीः
प्रवक्ष्यमाणं च निरूप्य मन्त्री ॥ १५ ॥

वृषहरिवृश्चिककलशा-
ख्यकेष्वथो केतुकेशवाद्यैश्च ।
मत्स्यादिकशेषाद्ये
समभियजेदन्तरा समावरणे ॥ १६ ॥

प्रानुप्रोद्यत्स्वराष्टद्वितयवृतमहाबीजकं शक्तिलक्ष्मी-
कामैरात्ताग्निकोणं बहिरभिवृतसिंहान्वितक्रोडमन्त्रम् ।
बिन्दूनामन्तरालेष्वपि च विलिखितैः कादिवर्गैश्च युक्तं
षड्भिर्वायव्यगेहावृतमभिमतकामप्रदं मेषयन्त्रम् ॥

गौरीन्दिरा रतिधृती
वसुधा पुष्टिक्षमासरस्वत्यः ।
मूर्त्योश्च मध्यमावृति-
राशेशात्प्राग्ध्वजादिरपि कथिता ॥ १८ ॥

हयरथगजभृत्यादी-
नरिभवशौर्यादिसिद्धिं च ।
तेजो यशश्च विपुलं
पूजयितुर्वितनुते विधानमिदम् ॥ १९ ॥

वर्णैराद्यैरमन्तैः समभिवृतमहाबीजमन्मध्यराज-
त्पान्तक्षाद्यक्षराढ्यं गुहनयनहुताश्रिराजन्मथार्णम् ।
अश्रेर्गण्डद्वयोद्यत्पचलिपिपरिवीतं च नाद्यैः सकान्तैः
काद्यैर्नान्तैश्च यन्त्रं बहुविधफलदं पूजितं स्याद्वृषोत्थम् ॥

नित्यानन्दा व्यापिनी व्योमरूपा
शान्तिर्विद्यारूपिणी च प्रतिष्ठा ।
कल्यामोघा चण्डिका दीप्तजिह्वे-
त्येवं प्रोक्ताथावृतिः स्यात्तृतीया ॥ २१ ॥

सुरभिहयमहिषदासी-
दासाभरणांशुकादिसिद्धिकरम् ।
वृषजं विधानमेत-
द्देहान्ते सिद्धिदं परस्य सतः ॥ २२ ॥

आगच्छन्मात्रभिख्यालिपिपरिवृतबीजं स्वरावीतवृत्तं
शाद्यैः क्षान्तैस्तदाद्यैरपि परिवृतगण्डं तदश्रात्तजुंसम् ।
भाद्यैः कान्तैः प्रवीतं मयरलत्रहयुग्बिन्दुकं वायुगेहा-
वीतं वाञ्छाप्रदानप्रसवगुणयुतं युग्मजं यन्त्रमेतत् ॥

इन्द्राणी कौमारिका ब्रह्मजाता
वाराह्याख्या वैष्णवी चाथ लक्ष्मीः ।
चामुण्डा माहेश्वरी स्यात्तृतीया
रक्षाप्रज्ञाश्रीप्रदं स्याद्विधानम् ॥ २४ ॥

पाशाद्यष्टाक्षरार्णप्रतिपुटितमहाष्टाक्षरावेष्टितान्त-
र्बीजं शाखान्तरूढे गगननृहरिबीजात्तकोणं बहिश्च ।
कामिन्यष्टाक्षराद्यन्तगहरिहरबीजावृतं प्रत्यनूद्य
द्वर्णाढ्यं वायुगेहस्थितमिति गदितं कर्कटोत्थं च यन्त्रम् ॥

रक्ता रमा कराली
कमला चण्डेन्द्रिरा महोच्छुष्मा ।
श्रीरिति मूर्तियुगलयो-
र्मध्यगता चावृतीरियं चापि ॥ २६ ॥

भूतिर्विभूतिरुन्नति-
नतिधृतिरतयश्च संयतिद्युतय: ।
आवृतिरेका प्रोक्ता
श्रीवश्यकरं विधानमिति कथितम् ॥ २७ ॥

ऊष्माणाष्टाक्षरावेष्टितहृदयमथ द्वादशार्णात्तकोणं
सान्त:स्थात्माष्टवर्णै: क्रमगतविगतैरुल्लसत्तत्त्वगण्डम् ।
सिंहानुष्टुब्द्वयार्णान्तरितवृतकलालंकृतं चाथ वह्नि-
प्राणेशानक्षपाटाश्रितकचटतपत्वच्छलं[1] सिंहयन्त्रम् ॥

पुष्टिस्तुष्टिर्धृतिरपि कृति: शान्तिकान्तिप्रमोदा
मेधा हर्षा स्मृतिरभिमता कान्तिका स्यात्तृतीया ।
कृष्ण: सत्यो नृहरिवरदौ विश्वमूर्तिर्वरेण्य:
शौरि: शूरो नरमुरजितौ विष्णुजिष्णू चतुर्थी ॥ २९ ॥

विपक्षनिग्रहं तेजो यशश्च धनसंगमम् ।
करोत्यर्चयितॄणां च विधानमिति सिंहजम् ॥ ३० ॥

सर्गाद्यान्ताद्यमन्त्रैरभिवृतहृदयं दण्डिभिश्चापि हाही-
हूहैहौहोभिरात्ताश्रिकमथ तु शिखाद्योतित्रर्गान्त्यवर्णम् ।

---

1. यशलं.

वर्णैः प्रत्यन्वितैः प्रावृतमवनिपुराश्रोल्लसत्कामबीजं
क्लिन्ने स्वाहार्णयुक्तं महिततरफलं कन्यकोत्थं च यन्त्रम् ॥

अत्राच्यों मधुसूदनस्त्वथ हृषीकेशाह्वयो मोहिनी
वैकुण्ठो विरजा हरिः सरसिजा शार्ङ्गी तमोहारिणी ।
अब्जाख्यः कमलावती च समुकुन्दाख्यो रमेति क्रमा-
न्मत्स्याद्यैश्च सुताश्च गोमहिषसौभाग्यप्रदं पावनम् ॥

आद्यैरावीतबीजं ग्रहवलययुतं हुंफडायुक्तकोणं
बाह्ये पाशाङ्कुशार्णावृतमथ युगषण्मूर्तिनामार्णमर्णैः[1] ।
प्रत्यन्वेष्यद्भिरुद्यद्धरियुतहरवर्णैश्च वीतं धरायाः
कोणेषूद्यन्नृसिंहाक्षरमिति कथितं स्यात्तुलायन्त्रमेतत् ॥

प्राक्प्रोक्तैश्चक्राद्यै-
रुक्तास्य समावृतिस्तृतीया स्यात् ।
प्रोतोपलब्धिमेत-
त्करोति वाणिज्यलाभं च ॥ ३४ ॥

अक्लीबद्वादशाब्द्वादशलिपिवृतहृल्लेखमश्रिद्विषट्क-
प्रोल्लास्यष्टाक्षरोष्मार्णकमपि लिपिभिः कादिभिश्चाभिवीतम् ॥

1. ०मन्त्रैः.

तद्बाह्ये चन्द्रबिम्बप्रपुटितवसुधामण्डलाश्रिप्रराज-
त्क्लीबार्णं वृश्चिकोत्थं प्रवरतरफलप्राप्तिदं यन्त्रमेतत् ॥ ३५ ॥

चिद्रूपा चिन्मया चिन्ता-
मणिः श्रीः क्षोणिसंज्ञिता ।
रतिश्च पावनी धारा
धरणी तारणी तथा ॥ ३६ ॥

द्राविणी मोहिनी चेति तृतीयेयं समावृतिः ।
अन्वयाप्तिं धर्मरतिं प्राप्नुयादस्य चार्चनात् ॥ ३७ ॥

षट्कोणाबद्धबाणासनविवरलसन्नारसिंहं तदन्तः
शक्तेर्बाह्ये परानुप्ररचितलघुसंध्यर्णयुक्पञ्चकाढ्यम् ।
अश्रिष्वाबद्धशिष्टस्वरमुपरिलसच्छूलकं चात्तवर्गं
भूम्योरष्टाश्रकोद्यद्दुजुहुलवकं चापयन्त्रं तदेतत् ॥३८॥

हर्षाह्वा सुनदारुणा सगगना घोरा रमा द्राविणी
वीरा वीरिणिहारिणी सहरिणी मन्दारिका द्वादश ।
प्रोक्तेयं च समावृतिः पुनरिदं संपूजयन्प्राप्नुया-
ल्लक्ष्मीसंततिबुद्धिवश्यपटुताकान्तीश्च भक्तिं शुभाम् ॥

मध्यस्थायाः परीतौ विलसदनुपरात्तस्वरप्राक्परार्धे
सिंहार्णान्ताश्रि गण्डस्फुरितहरिहरार्णं ग्रहार्णावृतं च ।
तद्बाह्ये षोडशार्णाक्षरवृतमुभकुंद्योतितं कोणराज-
त्सोऽहं हंसाक्षराढ्यं मकरभवमिदं यन्त्रमिष्टार्थदायि ॥

मेधा हर्षा श्रद्धा
कृपा रतिर्वा सरस्वती प्रीतिः ।
वाणी चेति तृतीया
वृतिरुक्ता मकरजे विधानेऽस्मिन् ॥ ४१ ॥

स्वक्षेत्रवर्तिनः स्यु-
र्ग्रहाः क्रमात्केशवादिमूर्तियुताः ।
अर्चयितॄणामेत-
द्धनधान्यसमृद्धिदं विधानं स्यात् ॥ ४२ ॥

शक्तिश्रीकामबीजैः पुटितहरिहरब्रह्मभिश्चावृतान्त-
र्बीजं कोणद्विषट्कस्फुरितनृहरिबीजप्रातिद्योतितं च ।
आदिक्षान्तैश्च वर्णैर्वृतमवनिपुरद्वन्द्वकोणान्तकाम-
श्रीशक्तिक्ष्मार्णचिन्तामणिमनु तदिदं श्रीकरं कुम्भयन्त्रम् ॥

[1]अच्युतकामिनिभानुमनोज्ञा
विश्वतनुर्विमला हरिभद्रे ।
सूक्ष्मसरस्वतिनन्दनसंध्या
स्यादिति मध्यगता वृतिरेषा ॥ ४४ ॥

अवनिपशुपुत्रसंपद-
मपि पितृसौख्यं च हृत्प्रबोधं च ।
कुरुते विधानमेत-
त्प्रयोक्तुरन्ते च निर्वृतिं परमाम् ॥ ४५ ॥

व्यन्वेष्यद्ध्रस्वदीर्घोच्चसमभिवृतमहाबीजमश्रेषु षट्सु
[2]द्योतत्सौमारलक्ष्मीगिरिदुहितृधराबीजकप्रोंसमेतम् ।
वीतं काद्यैः कषान्तैर्बहिरपि च कुकोणाष्टकोल्लासिहंसं
सर्वार्थान्साधकेभ्यो वितरति विधिवत्कल्पितं मीनयन्त्रम् ॥

हृष्टिर्वृष्टिस्तुष्टिरिष्टा सुपुष्टिः
कान्तिर्मेधा मङ्गला वामसंज्ञा ।
दुर्गा प्रज्ञा भारती मध्यसंस्था
वाक्सामर्थ्यं श्रीकरं स्याद्विधानम् ॥ ४७ ॥

---

1. अच्युतभामिनि. 2. द्योतद्वाङ्मार.

एभिर्विधानैर्धरणीव्रतादि-
　दीक्षाविधीन्ये विधिना प्रकुर्युः ।
ते पुण्यभाजो नितरां समृद्धाः
　सपुत्रदाराः सुखिनो भवन्ति ॥ ४८ ॥

दीर्घायुषो मुख्यतरेन्दिराश्च
　महाप्रभावाः स्वसमानवीर्याः ।
कलेबरान्ते विगताधयस्ते
　विष्णोरनन्यं पदमाप्नुवन्ति ॥ ४९ ॥

एभिर्विधेयाः कलशाश्च तत्त-
　न्मासोक्तयन्त्रेषु नरैर्यथावत् ।
निजेप्सितं प्राप्य मनोरथान्ते
　भुक्तेश्च मुक्तेरनुभावकाः स्युः ॥ ५० ॥

कर्षोन्मिते च हाटक-
　पट्टे पत्रं विलिख्य चतुरश्रे ।
तद्द्वित्र्यंशकृते वा
　कलशेषु विनिक्षिपेच्च दीक्षासु ॥ ५१ ॥

अभिषिच्य यन्त्रकनकं
गुरवे प्रददातु संयतः सुमतिः ।
दुरितापनोदविधये द्युतये
यशसे श्रिये च मतिसंयतये ॥ ५२ ॥

एषां यागविधीना-
मेकेन तु पूजयंस्तदवसाने ।
तत्तन्मूर्तिप्रीत्यै
संस्तोतव्योऽनया हरिः स्तुत्या ॥ ५३ ॥

प्रसीद भगवन्मह्यमज्ञानात्कुण्ठितात्मने ।
तवाङ्घ्रिपङ्कजरजोरागिणीं भक्तिमुत्तमाम् ॥ ५४ ॥

अज प्रसीद भगवन्नमितद्युतिपञ्जर ।
अप्रमेय प्रसीदास्मद्दुःखहन्पुरुषोत्तम ॥ ५५ ॥

स्वसंवेद्यस्वरूपात्मदानन्दात्मन्ननामय ।
अचिन्त्यसार विश्वात्मन्प्रसीदेश निरञ्जन ॥ ५६ ॥

प्रसीद तुङ्ग तुङ्गानां प्रसीद शिव शोभन ।
प्रसीद स्पष्ट गम्भीर गम्भीराणां महाद्युते ॥ ५७ ॥

प्रसीद व्यक्त विस्तीर्ण विस्तीर्णानामणोरणो ।
प्रसीदार्द्रार्द्रजातीनां प्रसीदान्तान्तदायिनाम् ॥ ५८ ॥

गुरोर्गरीयः सर्वेश प्रसीदानन्य देहिनाम् ।
जय माधव मायात्मञ्जय केशव केशिहन् ॥ ५९ ॥

जय सुन्दर सौम्यात्मञ्जय शाश्वत शङ्खभृत् ।
जय शार्ङ्गधर श्रीमञ्जय नन्दकनन्दन ॥ ६० ॥

जय चक्रगदापाणे जयाजय्य जनार्दन ।
जय रत्नाकराबन्ध किरीटाक्रान्तमस्तक ॥ ६१ ॥

जय पक्षिपतिच्छायानिरुद्धार्ककराकर ।
नमस्ते नरकाराते नमस्ते मधुसूदन ॥ ६२ ॥

नमस्ते नलिनापाङ्ग नमस्ते नयनाञ्जन ।
नमः पापहरेशान नमः सर्वभयापह ॥ ६३ ॥

नमः संभृतसर्वात्मन्नमः संभृतकौस्तुभ ।
नमस्ते नयनातीत नमो विक्रान्तवाक्पथ ॥ ६४ ॥

नमो विभिन्नज्ञेयांश नमः स्मृतिपथातिग ।
नमस्त्रिमूर्तिभेदेन सर्गस्थित्यन्तहेतवे ॥ ६५ ॥

विष्णवे त्रिदशारातिजिष्णवे परमात्मने ।
चक्रभिन्नारिचक्राय चक्रिणे चक्रबन्धवे ॥ ६६ ॥

विश्वाय विश्ववन्द्याय विश्वभूतात्मने नमः ।
नमोऽस्तु योगिध्येयाय नमोऽस्त्वध्यात्मरूपिणे ॥ ६७ ॥

भुक्तिप्रदाय भक्तानां नमस्ते मुक्तिदायिने ।
मनोवाक्कायचेष्टाः स्युर्ध्यानस्तुतिनमस्क्रियाः ॥ ६८ ॥

देवेश कर्म सर्वं मे भवेदाराधनं तव ।
विषयेष्वपि सङ्गो मे हुतं विष्णो तवाच्युत ॥ ६९ ॥

इति हवनजपार्चाभेदतो विष्णुपूजा-
निरतहृदयकर्मा यस्तु मन्त्री चिराय ।
स खलु सकलकामान्प्राप्य हृष्टान्तरात्मा
जननमृतिवियुक्तामुत्तमां मुक्तिमेति ॥ ७० ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे विंशः पटलः ॥

———❀———

एकविंशः पटलः ॥

—*—

अथोच्यते द्वादशवर्णसंज्ञो
मन्त्रस्तु साङ्गः सजपः सहोमः ।
विधानतो यं प्रतिजप्य भक्ता
भुक्तेश्च मुक्तेश्च पदं भवेयुः ॥ १ ॥

तारं सहृदयं मध्ये गवते स्युर्भवार्णयोः ।
सुययोश्च तथा देवा मन्त्रोऽयं द्वादशाक्षरः ॥ २ ॥

ऋषिः प्रजापतिश्छन्दो [1]गायत्रं विष्णुरुच्यते ।
देवता हृद्ध्रुवेण स्यान्नमसा शिर उच्यते ॥ ३ ॥

चतुर्भिश्च शिखावर्णैः पञ्चभिः कवचं भवेत् ।
प्रोक्तमस्त्रं समस्तेन पञ्चाङ्गविधिरीदृशः ॥ ४ ॥

सपादजानुयुगललिङ्गनाभ्युदरेषु च ।
हृद्दोर्गलास्यदृङ्मस्तशिखास्वक्षरतो[2] न्यसेत् ॥ ५ ॥

---

1. गायत्री ; 2. ०क्षरशो.

*P. II. 2

शिखाललाटनेत्रास्यगलदोर्हृदयेषु च ।
सकुक्षिनाभिलिङ्गाख्यजानुपादेषु विन्यसेत् ॥ ६ ॥

हृत्कुक्षिनाभिषु तथा गुह्यजानुपदेष्वधः ।
करकण्ठास्यदृङ्मस्तशिखासूर्ध्वं च विन्यसेत् ॥ ७ ॥

संहृतेर्दोषसंहारः सृष्टेश्च शुभपुष्टयः ।
स्थितेश्च शान्तिविन्यासस्तस्मात्कार्यस्त्रिधा मतः ॥ ८ ॥

हरिमुज्ज्वलचक्रदराब्जगदा-
कुलदोः परिघं सितपद्मगतम् ।
वलयाङ्गदहारकिरीटधरं
नवकुन्दरुचं प्रणमामि सदा ॥ ९ ॥

विधिवदथ विहितदीक्षो
जपेन्मनुं वर्णलक्षमानममुम् ।
शुद्धैश्च तिलैर्जुहुया-
द्द्वादशसाहस्रकं तथा मन्त्री ॥ १० ॥

पीठे हरेरथाङ्गैः
सशक्तिभिर्मूर्तिभिस्तदनु यजेत् ।

केशवसुरनाथाद्यै-
　　रपि देवं भक्तिपूर्वतो विद्वान् ॥ ११ ॥

समिधामथ दुग्धवृक्षजानां
　　जुहुयादर्कसहस्रकं सदुग्धम् ।
मनसः परिशुद्धये मनस्वी
　　सघृतेनापि पयोन्धसा सितेन ॥ १२ ॥

द्वादशाक्षरजपं तु सार्चनं
　　यो भजेत्सुनियतो दिने दिने ।
ऐहिकं समुपलभ्य वाञ्छितं
　　प्रेत्य याति [1]पदमक्षयं हरेः ॥ १३ ॥

अथ प्रवक्ष्यामि सुदर्शनस्य
　　विधिं मनोज्ञं ग्रहतेजपादैः ।
यत्सिद्धितः सिद्धिमवाप्य रम्यां
　　सिद्धा मुनीन्द्रा अपि सद्य एव ॥ १४ ॥

अन्त्यतुरीयतदादिक-
　　भृगुदहनानन्तवह्निवर्मास्त्रैः ।

1. पदमक्षरं

तारादिर्मनुरुक्तः
स्यादभिमतसिद्धिदो रथाङ्गाख्यः ॥ १५ ॥

ऋषिरस्याहिर्बुध्न्य-
श्छन्दोऽनुष्टुप्च देवता विष्णुः ।
चक्रपदैराविसुधी
सज्वालाद्यैः शिरोन्वितैरङ्गम् ॥ १६ ॥

ऐन्द्रीं समारभ्य दिशं त्वधस्ता-
दन्तं समुक्त्वा क्रमशो दशानाम् ।
चक्रेण बध्नामि नमस्तथोक्त्वा
चक्राय शीर्षं च दिशां प्रबन्धः ॥ १७ ॥

त्रैलोक्यं रक्ष रक्षेति हुंफट्स्वाहेति चोदितः ।
तारादिकोऽयं मन्त्रः स्यादग्निप्राकारसंज्ञकः ॥ १८ ॥

तारं तु मूर्ध्न्यथ सितारुणकृष्णवर्णं
मध्ये भ्रुवोश्च समथो वदने हकारम् ।
हृद्गुह्यजानुपदसंधिषु चावशिष्टा-
न्वर्णान्न्यसेदिति तनौ पुनरग्निवर्णान् ॥ १९ ॥

अव्याद्भास्करसप्रभाभिरखिला भाभिर्दिशो भासय-
न्भीमाक्षः क्षरदट्टहासविकसद्दंष्ट्राप्रदीप्ताननः ।
दोर्भिश्चक्रदरौ गदाब्जमुसलाखासींश्च पाशाङ्कुशौ
बिभ्रत्पिङ्गशिरोरुहोऽथ भवतश्चक्राभिधानो हरिः ॥२०॥

प्रोक्त्वा सुदर्शनायेति विद्महेऽन्ते महापदम् ।
ज्वालाय धीमहे चोक्त्वा तन्नश्चक्रः प्रचोदयात् ॥ २१ ॥

सौदर्शनीयं गायत्री जप्तव्या जप्तुमिच्छता ।
सांनिध्यकारिणीं मुद्रां दर्शयेदनया सुधीः ॥ २२ ॥

नमो भगवते प्रोक्त्वा महासुदर्शनाय च ।
महाचक्राय च तथा महाज्वालाय चेत्यथ ॥ २३ ॥

दीप्तिरूपाय चेत्युक्त्वा सर्वतो रक्ष रक्ष माम् ।
महाबलाय स्वाहेति प्रोक्तस्तारादिको मनुः ।
रक्षाकरः प्रसिद्धोऽयं क्रियमाणेषु कर्मसु ॥ २४ ॥

षट्कोणान्तःस्थतारं विवरलिखितमन्त्राक्षरं [1]सिद्धिराज-
त्स्वाङ्कं बाह्ये कलाकेसरमुदरगताष्टाक्षरं चाष्टपत्रम् ।

---

1. संधिराजत्

पद्मं वर्णैर्विराजद्विकृतिदललसत्षोडशार्णं त्रिवीतं
व्योमान्त्यार्णं स्वनाम्ना विरचितगुणपाशाङ्कुशं चक्रयन्त्रम् ॥

प्रणवहृद्भगवद्युतङे महा-
दिकरथाङ्गचतुर्थिहुमस्त्रकैः ।
निगदितस्त्विह षोडशवर्णको
मनुवरो मुनिभिर्विहितादरः ॥ २६ ॥

क्वाथैः पयोभूरुहचर्मसिद्धै-
र्दुग्धेन गन्धैरपि पञ्चभिर्वा ।
मूत्रैः पशोर्वा प्रतिपूर्य कुम्भं
समर्चयेच्चक्रहरिं यथावत् ॥ २७ ॥

अङ्गैः प्रथमावृतिरपि
पूज्या चक्रादिभिर्द्वितीया च ।
लक्ष्म्यादिभिस्तृतीया
क्रमात्तथेन्द्रादिभिश्चतुर्थी स्यात् ॥ २८ ॥

चक्रशङ्खगदापद्ममुसला धनुरेव च ।
पाशाङ्कुशौ पीतरक्तसितश्यामा द्विजस्त्विमाः ॥ २९ ॥

लक्ष्मीः सरस्वती चाथ रतिः प्रीत्याह्वया तथा ।
कीर्त्तिः कान्तिस्तुष्टिपुष्टी क्रमेणैव तु शक्तयः ॥ ३० ॥

संपूज्य चैवं विधिना हरिं तु
शिष्यं गुरुः प्रीततमोऽभिषिञ्चेत् ।
भक्त्या स्वशक्त्या विभवैर्द्विजाती-
न्संतर्प्य भूयो गुरुणानुशिष्टः ॥ ३१ ॥

एकाग्रचित्तो रविलक्षसंख्यं
जपेन्मनुं नित्यकृताभिपूजः ।
तावत्सहस्रं [1]किल सर्षपाश्च
बिल्वाज्यदौग्धानि जुहोतु सम्यक् ॥ ३२ ॥

समुद्रतीरेऽप्यथ वाद्रिशृङ्गे
समुद्रगानां सरितां च तीरे ।
जपेद्विविक्ते निज एव गेहे
विष्णोर्गृहे वा पुरुषो मनस्वी ॥ ३३ ॥

यथोक्तसंख्यं विधिवत्प्रजप्ते
मन्त्रे यथोक्तैश्च हुते हुताशे ।

---

1. ॰तिलसर्षपाश्च.

द्रव्यैरथ स्वार्थपरार्थहेतोः
कुर्यात्प्रयोगान्विधिना यथावत् ॥ ३४ ॥

पीताभा कर्णिका स्यादरुणतरमरं श्यामलं चान्तरालं
नेमि श्वेतं च बाह्ये [1]विरचितशितिरेखाकुलं पार्थिवान्तम् ।
चक्रद्वन्द्वं लिखित्वा विशदमतिरथो सौम्ययाम्यं च मन्त्री
कुम्भं संपूर्य सौम्ये प्ररचयतु तथा दक्षिणे होमकर्म ॥

षड्विंशच्छतसंमितैरथ घृतापामार्गजेध्माक्षतैः
सद्राजीतिलपायसैश्च सकलैर्द्रव्यैर्घृतान्तैः क्रमात् ।
हुत्वा तद्धुतशिष्टमत्र विधिवत्क्षिप्त्वा प्रतिद्रव्यकं
प्रस्थार्धान्नकृतं च पिण्डममलं कुम्भोदके मन्त्रवित् ॥

संस्थाप्य दक्षिणस्यां
साध्यं कुम्भेन तेन नीराज्य ।
तमथ घटं सद्रव्यं
बहिराराद‍ष्टमे क्षिपेद्राशौ ॥ ३७ ॥

अग्न्यादिकमपि सर्वं
क्षिपेदथ घटस्य दक्षिणे भागे ।

1. ०शिखिरेखाकुलं.

हुतशिष्टान्नेन बलिं
मन्त्रेणानेन मन्त्रवित्कुर्यात् ॥ ३८ ॥

हृदयान्ते विष्णुपदं
प्रोक्त्वाथ गणेभ्य उच्चरेत्सर्वम् ।
शान्तिकरेभ्यश्च बलिं
गृह्णन्त्विति शान्तये नमोन्तं स्यात् ॥ ३९ ॥

ज्वरादिकां रोगपरम्परां वा
विस्मृत्यपस्मारभवां रुजं वा ।
रक्षःपिशाचग्रहवैकृतं वा
विधिस्त्वयं मङ्क्षु हरेद्विकारम् ॥ ४० ॥

पालाशैर्वा स्तनज-
द्रुमजैर्वा पञ्जरे कृते फलकैः ।
संपूर्य पञ्चगव्यै-
स्तत्र तु संस्थाप्य शुद्धमपि गदिनम् ॥ ४१ ॥

पूर्वोद्दिष्टैर्दिक्ष्वपि
सजपं जुहुयुः पृथग्द्विजा वशिनः ।

द्रव्यैः स दक्षिणान्ता-
नभ्यर्च्य विमुच्यते रुजो जन्तुः ॥ ४२ ॥

विप्रक्षीरद्रुमत्वङ्कलयजपुरकाश्मीरकुष्ठत्रियामा[1]
बिल्वापामार्गराजीतिलतुलसियुगक्रान्तिदूर्वायवार्कैः ।
लक्ष्मीदेवीकुशागोमयकमलवचारोचनापञ्चगव्यैः
सिद्धेऽग्नौ कुम्भसिद्धं मनुजपमहितं भस्म सर्वार्थदायि ॥

लक्ष्म्यायुष्करमतुलं पिशाचभूता-
पस्मारादिकमचिरेण नाशयेच्च ।
क्षुद्रादीनपि विविधांस्तथोपसर्गा-
नेतस्मान्न परतरा समस्ति रक्षा ॥ ४४ ॥

जुहुयाद्गुग्गुलुगुळिका-
सहस्रकं साष्टकं च मन्त्रितमः ।
त्रिदिनं चतुर्दिनं वा
सर्वोपद्रवनिवारणं भवति ॥ ४५ ॥

खरमञ्जर्याः समिधा-
मयुतं वा मन्त्रवित्तमो जुहुयात् ।

1. ०त्रिधामा.

ज्वरभूतामयविस्मृ-
त्यपस्मृतीः शमयितुं नियतचित्तः ॥ ४६ ॥

आज्याक्तैर्जुहुयाच्छ्रिये सरसिजैर्दूर्वाभिरप्यायुषे
मेधायै द्विजभूरुहैश्च कुमुदैः श्वेतैस्तथा वाससे ।
शुद्धाज्यैः पशवेऽप्युदुम्बरभवैः पुत्राय चाश्वत्थजै-
रेकाब्दं विधिवत्सहस्रसमितैरष्टोत्तरं मुक्तये ॥ ४७ ॥

चक्रस्य नाभिसंस्थं
[1]कृत्वात्मानं मनुं जपेन्मन्त्री ।
स्वयमेकोऽपि न युद्धे
मर्त्यो बहुभिः पराजितो भवति ॥ ४८ ॥

मन्त्री सुनियतचित्त-
श्चक्रस्थं भ्रामयेद्धिया ग्रस्तम् ।
आविश्य सकलमुक्त्वा
मुञ्चति दग्धोऽग्निना शुनाभिभुवा ॥ ४९ ॥

दीप्तं करालदहनप्रतिमं च चक्रं
यस्य स्मरेच्छिरसि कस्यचिदप्रियस्य ।

1. स्मृत्वात्मानम्.

सप्ताहतोऽस्य दहनप्रतिमो ज्वरः स्या-
न्त्रिशद्दिनैश्च स परेतपुरं प्रयाति ॥ ५० ॥

कलावृतं चाहिपदाभिवेष्टितं
समक्षरं यच्छिरसि स्मरेत्सदा ।
दशाहतोऽसौ प्रति चास्यते रिपु-
र्मूर्ति तथा मण्डलतः प्रयाति ॥ ५१ ॥

सान्तं वायसवर्णं
शत्रोः शिरसि स्मरेच्च सप्ताहम् ।
उच्चाटयति क्षिप्रं
[1]मारयतोवाधिवोऽस्य नैशित्यात् ॥ ५२ ॥

स्रवत्सुधावर्षिणमिन्दुसप्रभं
समुज्ज्वलं यच्छिरसि प्रचिन्तयेत् ।
क्षणात्समाप्यायितसर्वविग्रहो
भवेत्स मर्त्यः सुचिरं च जीवति ॥ ५३ ॥

मध्ये तारं तदनु च मनुं वर्णशः कोणषट्के
बाह्ये चाङ्कं लिखतु करके रूप्यके वापि ताम्रे ।

1. मारयतेवाधियो.

पाषाणे वा विधिवदथ जप्याथ संस्थापितं त-
च्चक्रं चोरग्रहरिपुभयध्वंसि रक्षाकरं च ॥ ५४ ॥

स्थाने हृषीकेशविदर्भितं च
स्पष्टाक्षरं चाप्यभिजप्तमेतत् ।
रक्षां ग्रहादेः सततं विधत्ते
यन्त्रं सुक्लृप्तं च मनुत्रयेण ॥ ५५ ॥

अष्टाक्षरान्तरितपादचतुष्ककोष्ठं
कोष्ठत्रयालिखितसाध्यसुदर्शनं च ।
रेखाभिरप्युभयतः श्रुतिशः प्रबद्धं
तत्सप्तकोष्ठमिति यन्त्रमिदं प्रशस्तम् ॥ ५६ ॥

भूर्जे वा क्षौमपट्टे तनुमसृणतरे कर्पटे वास्य यन्त्रं
मन्त्री सम्यग्लिखित्वा पुनरपि गुलिकीकृत्य लाक्षाभिवीतम् ।
कृत्वा भस्मादिहोमप्रविहितघृतसंपातपाताप्तशक्तिं
जप्तं सम्यङ्निदध्यात्प्रतिशममुपयान्त्येव सर्वे विकाराः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे एकविंशः पटलः ॥

द्वाविंशः पटलः ॥

अथोच्यते श्रीकरनामधेय-

मष्टाक्षरं लोकहिताय तावत् ।

येन प्रजप्तेन समर्चितेन

हुतेन सिद्धिं समुपैति मन्त्री ॥ १ ॥

सर्गादर्कः क्षतो विंशतियुगमयुतं शान्तगं चन्द्रबिम्बं

श्रीबाहुः शुक्रमेदोहरिशयनहकारा मनुः श्रीकराख्यः ।

ऋष्याद्या वामपङ्क्तीरहरिपि पुनरङ्गानि यान्तैर्हुमन्तै-

र्भीषत्रासप्रमर्दप्रसहितगदितध्वंसरक्षैर्द्विरुक्तैः ॥ २ ॥

मूर्धाक्षिकण्ठहृदयोदरसोरुजानु-

पादद्वयेषु लिपिशो न्यसतु स्वदेहे ।

विप्रादिकान्मुखकरोरुपदेषु वर्णा-

श्चक्रादिकानपि करेषु ततस्तदस्त्रान् ॥ ३ ॥

दुग्धाब्धिद्वीपवर्यप्रविलसितसुरोद्यानकल्पद्रुमाधो
भद्राम्भोजन्मपीठोपरिगतविनतानन्दनस्कन्धसंस्थः ।
दोर्भिर्बिभ्रद्रथाङ्गं सदरमथ गदापङ्कजे स्वर्णवर्णो
भास्वन्मौलिर्विचित्राभरणपरिगतः स्याच्छ्रिये वो मुकुन्दः ॥

दिक्पत्रेषु श्रीरति॰
धृतिकान्तीः कोणकेषु मूर्तीश्च ।
इष्ट्वाभितो निधीशौ
विष्वक्सेनं च दिक्पतीन्प्रयजेत् ॥ ५ ॥

आराध्य चैवं विधिना च विष्णुं
मन्त्री पुनर्होमविधिं करोतु ।
[1]श्रीदुग्धवृक्षोत्थसमिद्भिरब्जैः
साज्येन दौग्धेन च सर्पिषा च ॥ ६ ॥

पृथगष्टशतं क्रमेण हुत्वा
कनकाद्यैरपि तर्पिते गुरौ च ।
अभिषिच्य तथाभिपूज्य विप्रा-
न्मनुमेनं प्रजपेदथाष्टलक्षम् ॥ ७ ॥

---

1. श्रीवृक्षदुग्धोत्थ॰

द्रव्यैस्तैः प्रतिजुहुयाद्दशांशमानै-
राचार्यं पुनरपि पूजयेज्जपान्ते ।
संप्राप्नोत्यपरिमितां श्रियं च कीर्ति
कान्तिं वा चिरमनुरज्यते च लोकैः ॥ ८ ॥

दूर्वां घृतप्रसिक्तां
जुहुयादयुतं नरस्तु हुतशिष्टैः ।
आज्यैश्चरुमुपयुञ्ज्या-
द्द्याद्गुरवे च दक्षिणां शक्त्या ॥ ९ ॥

परिपूजयेच्च विप्रां-
स्तेषु दिनेषु स्वशक्तितो भक्त्या ।
अपमृत्युरोगपापा-
न्विजित्य स तु दीर्घमायुराप्नोति ॥ १० ॥

अनुदिनमादित्यमुखः
प्रजपेदूर्ध्वीकृतस्वबाहुयुगः ।
तस्य गृहेऽन्नसमृद्धि-
श्चिराय संजायते सुपुष्टतरा ॥ ११ ॥

एवं प्रोक्तैः प्रतिजपहुतार्चादिभिर्मन्त्रमेनं
　भक्त्या यो वा भजति मनुजो नित्यशः सोऽचिरेण ।
इष्टैः पुत्रैर्धरणिधनधान्यादिभिर्हृष्टचेताः
　स्यादप्यन्ते परमपरिशुद्धं परं धाम विष्णोः ॥ १२ ॥

अथ कथयामि विधानं
　महावराहाभिधानमन्त्रस्य ।
साङ्गं सजपं सहुता-
　राधनमपि मन्त्रिणामभीष्टाप्त्यै ॥ १३ ॥

वाक्यं प्रोक्त्वा हृदाख्यं तदनु भगवतेयुग्वराहं च रूपा-
　येत्युक्त्वा व्याहृतीनामुपरि च पतये भूपतित्वं च मेऽन्ते ।
देहीत्याभाष्य दान्तः सुमतिरथ पुनर्दापयस्वेति हान्तं
　प्रोक्त्वा तारादिकं प्रोद्धरतु मनुवरं तत्र यस्त्रिंशदर्णम् ॥

ऋषिस्तु भार्गवः प्रोक्तोऽथानुष्टुप्छन्द ईरितम् ।
वराहो देवता चास्य कथ्यन्तेऽङ्गान्यतः परम् ॥ १५ ॥

अस्यैकशृङ्गो हृदयं शिरश्च
　व्योमोल्कतेजोऽधिपतिः शिखा च ।
*P II. 3

स्याद्विश्वरूपं कवचं महाद्यो
दंष्ट्रोत्थमुक्तं स्वयमेव चाङ्गम् ॥ १६ ॥

सप्तभिश्च पुनः षड्भिः सप्तभिश्चाथ पञ्चभिः ।
अष्टभिर्मूलमन्त्रार्णैर्विदध्यादङ्गकल्पनाम् ॥ १७ ॥

जान्वोरापादमुद्यत्कनकमिव हिमप्रख्यमाजानु नाभेः
कण्ठादानाभि वह्निप्रभमथ शिरसश्चागलं नीलवर्णम् ।
मौलेर्व्योमाभमार्कं करलसदरिशङ्खासिखेटं गदा श-
क्त्याख्येष्टाभीतियुक्तं प्रणमत वसुधोल्लासिदंष्ट्रं वराहम् ॥

सजलाम्बुवाहनिभमुद्धतदोः-
परिघं धराधरसमानतनुम् ।
सितदंष्ट्रिकाधृतभुवं त्वथ वा
प्रविचिन्तयेत्सपदि कोलमुखम् ॥ १९ ॥

हेमप्रख्यं पार्थिवे मण्डले वा
नीहाराभं नीरजेऽम्भस्तदाभम् ।
वायोः कृष्णं द्युप्रभं वा दिविस्थं
क्रोडं ध्यायेत् सत्यसंस्थं यजेद्वा ॥ २० ॥

अष्टपत्रमथ पद्ममुल्लस-
त्कर्णिकं विधिवदारचय्य च ।
मण्डले रविसहस्रसंनिभं
सूकरं यजतु तत्र सिद्धये ॥ २१ ॥

प्राग्दक्षिणप्रत्यगुदग्दिशासु
चत्वारि चाङ्गानि यजेत्क्रमेण ।
अस्त्रं विदिक्षूर्ध्वमधश्च चक्रा-
द्यस्त्राणि पूज्यानि वराहमूर्तेः ॥ २२ ॥

अरिशङ्खकृपाणखेटसंज्ञा-
न्सगदाशक्तिवराभयाह्वयांश्च ।
अभिपूज्य दिशाधिपान्यथाव-
द्वरगन्धाक्षतपुष्पधूपदीपैः ॥ २३ ॥

दंष्ट्रायां वसुधां सशैलनगरारण्यापगां हुंकृतौ
वागीशीं श्वसितेऽनिलं रविशशी बाह्वोश्च दक्षान्ययोः ।
कुक्षौ स्युर्वसवो दिशः श्रुतिपथे दस्रौ दृशोः पादयोः
पद्मोत्थो हृदये हरिः पृथगमी पूज्या मुखे शंकरः ॥

एवं काले कोलमभ्यर्चयित्वा
जप्यो मन्त्रोऽसौ पुनर्लक्षसंख्यम् ।
होमं कृत्वा तद्दशांशैश्च पद्मै-
स्त्रिस्वाद्वक्तैः प्राप्नुयाद्भूसमृद्धिम् ॥ २५ ॥

ध्यानादपि धनसिद्धि-
र्मन्त्रजपाच्चाधरो भवेत्सधरः ।
जपपूजाहुतविधिभि-
र्मङ्क्षु नरो धनधरेन्दिरावान्स्यात् ॥ २६ ॥

ध्यातः सन्भूगृहेऽसौ भुवमतुलतरां वारुणे शान्तिमुच्चै-
राग्नेये वश्यकीर्त्यादिकमनिलपुरस्थोऽयमुच्चाटनादीन् ।
रक्षां व्योम्नोऽरिभूतग्रहविषदुरितेभ्योऽनिलाग्न्योश्च पीडां
युद्धे वह्नीरयोर्वै जयमपि नितरां संनिधत्ते वराहः ॥

हरिस्थेऽर्केऽष्टम्यामथ सितरुचौ कोलवपुषा
सितां गन्धैः सर्वैर्युतमयुतजप्तामपि शिलाम् ।
उदग्वक्त्रो मन्त्री मनुजपरतः स्थापयतु ता-
मयत्नं क्षेत्रेषु द्रुतमरिनिरोधं शमयति ॥ २८ ॥

भौमे वारेऽथ भानूदयमनु जपवान्संगृहीत्वा मृदंशं
कोलात्मा वैरिरुद्धादपि च कुतलतस्तं च कृत्वा गुणांशम् ।
एकं जातौ विलिप्यात्पुनरपरतरं पाकपाके तथान्यं
तोये तस्मिन्सदुग्धे प्रतिपचतु हविः संस्कृते हव्यवाहे ॥

आराध्य चाष्टोर्ध्वशतप्रमाणं
साज्येन मन्त्री हविषाथ तेन ।
सप्तारवारं जुहुयाद्यथाव-
त्क्षेत्रोत्थितापत्प्रशमं प्रयाति ॥ ३० ॥

भृगुवारे च मुखेऽह्नः
संगृह्य मृदं हविः समापाद्य ।
जुहुयादीरितविधिना
बलिमपि दद्यान्महाविरोधेषु ॥ ३१ ॥

हुतक्रियैवं दिवसैश्च सप्तभि-
र्विनाशयेद्भूमिविवादसंकटम् ।
परेतवेतालपिशाचडाकिनी-
समुत्थितां वा विकृतिं विधिस्त्वयम् ॥ ३२ ॥

विलोड्य तामेव मृदं च दुग्धे
हुनेद्धृते वाष्टयुतं सहस्रकम् ।
द्विमण्डलादेव मही महार्घ्या
स्यान्मन्त्रिणोऽस्यैव तु निःसपत्ना ॥ ३३ ॥

नृपतरुसमिधामयुतं
मन्त्रेणानेन यो हुनेन्मन्त्री ।
गृहयात्रास्य न सीदे-
त्क्षेत्रादिकमपि च वर्धते क्रमशः ॥ ३४ ॥

अष्टोर्ध्वशतं मन्त्री
दिनशो यो वा जुहोति शालीभिः ।
स तु वत्सरेण मन्त्री
विराजते व्रीहिपुञ्जपूर्णगृहः ॥ ३५ ॥

मन्त्रेणानेन सर्पिर्जुहुत दशशतं मण्डलात्स्वर्णसिद्धिः
स्याद्रक्तेनाञ्जलिन्या अपि कुसुमसहस्रेण वा वाससां च ।
लाजानां कन्यकाया अपि च मधुमतां होमतो वाञ्छितायाः
सिद्धी रक्तोत्पलानामपि मधुरयुजां स्याद्धुताच्छ्रीः समग्रा ॥

दण्ड्यर्घीशो व्योमा-
    सनस्तु वाराहमुच्यते बीजम् ।
अमुना तु साधितेन
    प्राप्स्यन्ति नराः समृद्धिमतुलतराम् ॥ ३७ ॥

[1]तारेऽमुमपि लिखित्वा
    तद्बाह्येऽनलपुरं समापुटितम् ।
तद्बाह्ये च चतुर्दल-
    मब्जं स्यात्तद्बहिस्तथाष्टदलम् ॥ ३८ ॥

बाह्ये षोडशपत्रं
    मण्डलमाखण्डलीयमपि बाह्ये ।
मध्ये सूकरबीजे
    साध्यक्षेत्राख्यमन्त्रमश्रिषु च ॥ ३९ ॥

रन्ध्रेष्वङ्गमनूनपि
    दलमूलेऽष्टार्णकेसराणि लिखेत् ।
अष्टावष्टौ दलमनु
    सूकरमन्त्रस्य चाक्षरान्क्रमशः ॥ ४० ॥

---

1. तार इमं विलिखित्वा

अन्त्येऽवशिष्टमक्षर-
मथाष्टपत्रे स्वराख्यकिञ्जल्के ।
वर्णाश्चतुश्चतुरपि
तथाष्टमे पञ्च चालिखेत्पत्रे ॥ ४१ ॥

व्यञ्जनकिञ्जल्केऽन्त्ये
द्वौ द्वौ त्रयमन्त्यके दले विलिखेत् ।
तारमहीकोलार्णैः
प्रवेष्टयेत्साध्यवर्णपरिपुटितैः ॥ ४२ ॥

तद्बाह्ये मनुवर्णै-
र्विदर्भिताभिश्च साध्यपदलिपिभिः ।
क्ष्माबिम्बचतुष्कोणे
गर्भगसाध्याक्षरं [1]चतुर्बीजम् ॥ ४३ ॥

अष्टसु शूलेषु तथा
वाराहं [2]वासुसेनसंवृत्तम् ।
लाक्षाकुङ्कुमचन्दन-
लघुकर्पूरैः सरोचनैर्विलिखेत् ॥

1. च भूबीजम् 2. वासुधेनसंपृक्तम्

गोशकृदम्भोयुक्तै-
लेखिन्या हैमया दिने प्रवरे ॥ ४४ ॥

सौवर्णे राज्यसिद्धिं रजतकफलके ग्रामसिद्धिं च ताम्रे
साहस्रस्वर्णसिद्धिं भुजदललिखितं चाशु संसारयात्राम् ।
क्षौमे लाभं धरायाः पिचुतरुफलके कार्यसिद्धिं निजेष्टां
यन्त्रं संजप्तक्लृप्तं घृतहुतकृतसंपातपातं करोति ॥ ४५ ॥

मन्त्री समास्थाय वराहरूपं
साध्यप्रदेशे निखनेच्च यन्त्रम् ।
स्थिराख्यराशावभिवाह्य कोल-
मङ्गानि दिक्षु क्षिपतां यथावत् ॥ ४६ ॥

यन्त्रमिदं रक्षायै
रोगग्रहवैकृतेषु जन्तूनाम् ।
संजप्य शिरसि बन्ध्या-
त्स तु नीरोगस्त्वयत्नतो भवति ॥ ४७ ॥

इत्येवं प्रणिगादितो वराहमन्त्रो
यस्त्वेनं प्रभजति नित्यशो जपाद्यैः ।

स प्राप्नोत्यखिलमहीसमृद्धिमस्मि-
न्देहान्ते व्रजति हरेः परं पदं तत् ॥ ४८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे द्वाविंशः पटलः ॥

त्रयोविंशः पटलः ॥

अथ प्रवक्ष्यामि नृसिंहमन्त्र-

स्यानुष्टुभः संग्रहतो विधानम् ।

साङ्गं सजापं सहुतक्रमं च

सार्चाविधानं निजवाञ्छिताप्त्यै ॥ १ ॥

उग्रं वीरयुतं महान्तिकमथो विष्णुं ज्वलन्तान्वितं

संप्रोक्त्वाथ च सर्वतोमुखनृसिंहार्णं तथा भीषणम् ।

भद्रं मृत्युयुतं च मृत्युमपि च प्रोक्त्वा नमाम्या युतं

भूयोऽहंपदमुद्धरेन्मनुमिमं मन्त्री समस्तार्थकम् ॥ २ ॥

ब्रह्मा प्रजापतिर्वा

प्रोक्त ऋषिर्नारदश्च विद्वद्भिः ।

छन्दोऽनुष्टुबुदाहृत-

मथ विष्णुर्देवता नृसिंहाख्यः ॥ ३ ॥

वर्णैश्चतुर्भिरुदितं हृदयं शिरश्च
तावद्भिरष्टभिरथास्य शिखा प्रदिष्टा ।
षड्भिश्च वर्म नयनं च चतुर्भिरस्त्रं
प्रोक्तं क्रमेण मनुनाक्षरशः षडङ्गम् ॥ ४ ॥

सशिरोललाटदृग्युग-
मुखकरपदसंधिकेषु साग्रेषु ।
उदरहृदोर्गलपार्श्वे-
ष्वपरे ककुदि क्रमान्न्यसेद्वर्णान् ॥ ५ ॥

प्रतिपत्तिरस्य चोक्ता
प्रसन्नता क्रूरता विशेषेण ।
द्विविधा प्रसन्नया स्या-
त्साधनपूजान्यया प्रयोगविधिः ॥ ६ ॥

जान्वोरासक्ततीक्ष्णस्वनखरुचिलसद्बाहुसंस्पृष्टकेश-
श्चक्रं शङ्खं च दोर्भ्यां दधदनलसमज्योतिषा भग्नदैत्यः ।
ज्वालामालापरीतं रविशशिदहनत्रीक्षणं दीप्तजिह्वं
दंष्ट्रोग्रं धूतकेशं वदनमपि वहन्पातु वो नारसिंहः ॥ ७ ॥

उद्यद्भास्वत्सहस्रप्रभमशनिनिभत्रीक्षणैर्विक्षरन्तं
वह्नीनह्नाय विद्युत्ततिविततसटाभीषणं भूषणैश्च ।
दिव्यैरादीप्तदेहं निशितनखलसद्बाहुदण्डैरनेकैः
संभिन्नं भिन्नदैत्येश्वरतनुमतनुं नारसिंहं नमामि ॥ ८ ॥

नरसिंहममुं धियैव पूर्वं
प्रणिपत्यार्घ्यकपाद्यसाचमाद्यैः ।
प्रयजेत्सहगन्धपुष्पधूपा-
दिभिरेवं प्रवरैश्च नृत्तगीतैः ॥ ९ ॥

सुविशदमतिरथ बहिरपि
सम्यक्संपूज्य वैष्णवं पीठम् ।
तत्रावाह्य च नरहरि-
मुपचारैः सम्यगर्चयेत्प्रवरैः ॥ १० ॥

अङ्गैः प्रथमावृतिरपि
पक्षीन्द्रानन्तशर्वकमलभवैः ।
सश्रीह्रीधृतिपुष्टिभि-
रपरोक्ता लोकपालकैरन्या ॥ ११ ॥

प्राक्प्रत्यग्यमशशिनां
  दिगाश्रया मूर्तयोऽनलादिषु च ।
स्युः शक्तय इत्येवं
  भक्त्या परया युतोऽर्चयेद्देवम् ॥ १२ ॥

द्वात्रिंशके सहस्रै-
  रधिकृतिरयुतैर्भवेत्पुरश्चरणम् ।
तावद्भिस्तावद्भि-
  र्लक्षैः सिद्धिः समीरितास्य मनोः ॥ १३ ॥

विकृतिद्विगुणसहस्रै-
  र्जुहुयादाज्यान्वितैश्च दुग्धान्नैः ।
जपसंपूर्तौ मन्त्री
  दिनशः संपूजयेच्च नरसिंहम् ॥ १४ ॥

विधाय तद्बीजविशिष्टकर्णिकं
  चतुश्चतुर्वर्णलसद्दलाष्टकम् ।
सुलक्षितं मण्डलमन्यलक्षणै-
  र्निधाय तस्मिन्कलशं प्रपूर्य च ॥ १५ ॥

यथोक्तमार्गेण समर्च्य साष्टकं
सहस्रसंख्यं प्रजपेन्मनुं ततः ।
त्रिरुच्चरन्मन्त्रमथाभिषेचये-
द्यमेष मृत्योर्विनिवर्तते मुखात् ॥ १६ ॥

वर्णान्तानलभुवना-
[1]र्धेन्दुभिरुक्तं नृसिंहबीजमिदम् ।
तन्नास्ति सम्यगमुना
मन्त्रविदा साधितेन यदसाध्यम् ॥ १७ ॥

विभवानुरूपतोऽस्मै
दातव्या दक्षिणा च निजगुरवे ।
प्राणप्रदानकर्त्रे
न तु कार्यं वित्तशाठ्यममलधिया ॥ १८ ॥

संप्रीणयित्वा गुरुमात्मशक्त्या
संभोजयेद्द्विप्रवरान्यथावत् ।
स त्वैहिकीं सिद्धिमवाप्य शुद्धं
परं परत्रापि पदं समेति ॥ १९ ॥

---

1. बिन्दुभिरुक्तं

दूर्वात्रिकैरष्टसहस्रसंख्यै-
राराध्य मन्त्री जुहुयादथाप्सु ।
शान्तिं प्रयान्त्येव तदोपसर्गा
आपो हि शान्ता इति च श्रुतिः स्यात् ॥ २० ॥

उत्पाते महति सति ह्युपद्रवाणां
होमोऽयं भवति च शान्तिदो नराणाम् ।
यद्वान्यन्निजमनसेप्सितं च कामं
तच्चाप्नोत्यखिलनृणां प्रियश्च भूयात् ॥ २१ ॥

दुःस्वप्नेष्वपि दृष्टे-
ष्ववशिष्टा जाग्रता निशा नेया ।
जपमानमन्त्रशक्त्या
सुस्वप्नो भवति तत्क्षणादेव ॥ २२ ॥

चरन्वने दुष्टमृगाहिचोर-
व्यालाकुले मन्त्रममुं जपेद्यः ।
असाधितं साधितमेव तस्य
न विद्यते भीर्बहुरूपजाता ॥ २३ ॥

जपेनाष्टसहस्रं
कलशेनाप्यहिविषार्तमभिषिञ्चेत् ।
अतिविषमेण विषेणा-
प्यसौ विमुक्तः सुखी भवति ॥ २४ ॥

[1]मूषिकलूतावृश्चिक-
बहुपादाद्युत्थितं विषं शमयेत् ।
अष्टोत्तरशतजापा-
न्मनुरयमभिमन्त्रितं च भस्माद्यम् ॥ २५ ॥

[2]सशिरोक्षिकण्ठदद्रुल-
कुक्षिरुजाज्वरविसर्पवमिहिक्काः ।
मन्त्रौषधाभिचारक-
कृतान्विकारानयं मनुः शमयेत् ॥ २६ ॥

नरहरिवपुषात्मना गृहीतं
हरिणशिशुं निजवैरिणं विचिन्त्य ।
क्षिपतु गगनतः क्षितौ सुदूरं
यमनुदिनं प्रतिचाट्यते समासात् ॥ २७ ॥

---

1. मूर्तिक॰ 2. ॰कर्णदद्रुल

*P. II. 4

यां च दिशं प्रति मनुना
क्षिप्तोऽसौ तां दिशं प्रयात्यचिरात् ।
पुत्रकलत्रंधनादीं-
स्त्यक्त्वा त्वपुनर्निवृत्तये सहसा ॥ २८ ॥

नरहरिवपुषात्मना निजारिं
नखरखराग्रसमग्रभिन्नदेहम् ।
क्षणमिव निहतं विचिन्त्य खाद-
न्निव जपतां मनुमेष नाशमेति ॥ २९ ॥

पूर्वतरे मृत्युपदे
विधाय निजसाध्यनाम मन्त्रितमः ।
क्रूरेण चक्षुषा तं
दहन्निवालोक्य जपतु सप्तदिनम् ॥ ३० ॥

दिनशोऽष्टोर्ध्वसहस्रं
म्रियते रिपुरस्य नात्र संदेहः ।
मारणकर्म न शस्तं
क्रियते यद्ययुतमथ जपेच्छान्त्यै ॥ ३१ ॥

वश्याकृष्टिद्वेषण-
  मोहोच्चाटादिकानि यदि वाञ्छेत् ।
तदर्हया प्रतिपत्त्या
  तत्तत्कर्म प्रसाधयेन्मन्त्री ॥ ३२ ॥

दिनमनु दिननाथं पूजयित्वा दिनादौ
  नरहरिमपि सम्यक्प्रोक्तमार्गेण मन्त्री ।
तदनु तदनुमत्या भस्मना मन्त्रितेन
  प्रतिरचयतु राज्ञे वाप्यभीष्टाय रक्षाम् ॥ ३३ ॥

न्यासोक्तेषु स्थाने-
  ष्वपि न्यसेद्भस्मना समन्त्रार्णम् ।
अखिलोपद्रवशान्त्यै
  संपत्त्यै वाञ्छितार्थसंसिद्ध्यै ॥ ३४ ॥

अथ परराष्ट्रजयेच्छो
  राज्ञः कुर्यात्प्रयोगविधिमेवम् ।
नरहरिमपि विधिना तं
  हिरण्यकशिपुद्विषं समभ्यर्च्य ॥ ३५ ॥

तस्य पुरस्ताद्विधिव-
 न्निधाय वह्निं बिभीततरुकाष्ठैः ।
उज्ज्वलिते च ज्वलने
 समूलतूलैः शरेध्मदशशतकैः ॥
खादन्निवोच्चरन्मनु-
 मरींश्च भिन्दन्निव क्षिपेत्समिधः ॥ ३६ ॥

हुत्वा परराष्ट्रेभ्यः
 पृतनां संनाह्य च पुरस्तस्याः ।
निघ्नन्तं रिपुसेनां
 स्मरन्नृसिंहं पुरेव दितितनयात् ॥ ३७ ॥

यावज्जितारिरेष्यति
 नृपतिस्तावज्जपेत्स्मरन्नेवम् ।
सेन्द्रसुरासुररक्षो-
 यक्षानपि जयति का कथा मनुजे ॥ ३८ ॥

श्रीकामः श्रीप्रसूनैर्दशकमथ शतानां हुनेद्बिल्वकाष्ठै-
 स्तत्पत्रैर्वा प्रसूनैः सुमतिरथ समिद्भिः फलैर्वा तदीयैः ।

पुत्रेप्सुः पुत्रजीवेन्धनचितदहने तत्फलैर्वा सहस्रं
दूर्वाभिस्त्वायुषेऽब्दादभिमतमखिलं प्राप्नुयान्मन्त्रजापी ॥

ब्राह्मीं वचां वाष्टशताभिजप्तां
प्रातः समद्यान्नृहरिं विचिन्त्य ।
संप्राप्य मेधां स तु वेदशास्त्र-
निष्णातधीः स्यादपि वासरेण ॥ ४० ॥

उक्तैः किमत्र बहुभिर्मनुनामुनैव
संप्रार्थितं सकलमेव लभेद्विधिज्ञः ।
तस्मादमुं भजत तत्प्रतिपन्नचित्ताः
संसारसागरसमुत्तरणार्थिनो ये ॥ ४१ ॥

पाशाङ्कुशान्तरितशक्तिनृसिंहबीजै[1]-
र्वर्माख्ययुङ्मनुरयं कथितः षडर्णः ।
ऋष्यादिकाः स्वभवपङ्क्तिकनारसिंहा
वर्णैश्च मन्त्रनिहितैः कथितं षडङ्गम् ॥ ४२ ॥

अव्यान्निर्व्याजरौद्राकृतिरभिविवृतास्योल्लसत्तीक्ष्णदंष्ट्र-
श्चक्रं शङ्खं च पाशाङ्कुशकुलिशगदादारणाख्यान्दधानः ।

1. ०बीजौ

रक्ताकारश्च नाभेरध उपरि सितो दिव्यभूषाविशेषो
देवोऽर्काग्नीन्दुनेत्रो निखिलसुखकरो नारसिंहश्चिरं वः ॥

हृल्लेखान्तःस्थसाध्यं दहनपुरयुगाश्रिस्थमन्त्रार्णमन्तः-
सिंहानुष्टुप्चतुर्वर्णकलसितदलाढ्यं कलाकेसरं च ।
वृत्तोद्यद्व्यञ्जनावेष्टितमवनिपुराश्रस्थचिन्तोपलं त-
द्यन्त्रं रक्षःपिशाचामयविषयरिपुध्वंसनं[1] नारसिंहम् ॥

इति विरचितयन्त्रप्रोज्ज्वले मण्डले प्रा-
क्समभिहितकषायाम्भोभिरापूर्य कुम्भम् ।
प्रतियजतु तदङ्गैरस्त्रभेदैस्तदीयै-
स्तदनु मखशताद्यैः साधुवज्रादिकैश्च ॥ ४५ ॥

रथचरणशङ्खपाशा-
ङ्कुशकुलिशगदाह्वयानि चास्त्राणि ।
दारुणमुद्राकरयो-
र्ययोस्तदीयौ कृपाणखेटाख्यौ ॥ ४६ ॥

इति कृतदीक्षः प्रजपे-
दक्षरलक्षप्रमाणकं मन्त्रम् ।

---

1. ०विषरिपु०

जुहुयाच्च षट्सहस्रं
जपावसाने घृतेन शुद्धेन ॥ ४७ ॥

खरमञ्जरीसमुत्थं
जुहुयादथ मञ्जरीसहस्रत्रयम् ।
प्रस्नातपञ्चगव्यं
सप्तदिनं भूतशान्तये मन्त्री ॥ ४८ ॥

छिन्नरुहां समिधां त्रिसहस्रं
यश्च जुहोति चतुर्दिनमात्रम् ।
दुग्धयुजं नचिरान्मनुजानां
होमविधिर्ज्वरशान्तिकरः स्यात् ॥ ४९ ॥

अस्य यन्त्रमभिलिख्य भूर्जके
साधु चाथ तृणराजपत्रके ।
मन्त्रजप्तमपि शीर्षबन्धना-
ज्जूर्तिविभ्रमशिरोरुजापहम् ॥ ५० ॥

रक्तोत्पलैः प्रतिदिनं मधुरत्रयाक्तै-
र्यो वा जुहोति नियमेन सहस्रसंख्यैः ।

मासेन वाञ्छितमवाप्स्यति मन्त्रजापी
स्याद्वत्सरेण धनधान्यसमृद्धगेहः ॥ ५१ ॥

आरक्तैस्तरणिसहस्रकं प्रफुल्लै-
रम्भोजैस्त्रिमधुरसंयुतैर्जुहोति ।
लक्ष्मीः स्यादथ महती महत्तथायुः
संप्राप्तः सकलजगत्प्रियश्च[1] भूयात् ॥ ५२ ॥

लाजाभिस्त्रिमधुरसंयुताभिरह्नो
मासार्धं प्रतिजुहुयान्मुखे सहस्रम् ।
कन्यार्थी प्रतिलभते वरोऽथ कन्यां
कन्या वा भवति वरार्थिनी वराढ्या ॥ ५३ ॥

तिलैः सराजीखरमञ्जरीसमि-
द्धविर्घृतैश्च द्विसहस्रसंख्यकैः ।
प्रजुह्वतो नैव रुजा ग्रहोद्भवा
न चाभिचारक्षतिरस्य जायते ॥ ५४ ॥

दशाधिकशतैः पयोघृतयुतैश्च दूर्वात्रयै-
र्हुनेद्दिनमुखेऽपि यो नरहरिं विचिन्त्यानले ।

1. ०जगद्धितश्च.

अवाप्य स तु दीर्घमायुरखिलैर्वियुक्तो गदैः
सुखी भवति मानवो निजकलत्रपुत्रादिभिः ॥

विस्तारैः किं प्रतिजपति यो मन्त्रमेनं यथोक्तं
लब्ध्वा कामान्समभिलषितानाशु मन्त्री स भूयः ।
द्रव्यैराढ्यो द्विजनृपवरैः पूजितः शान्तचेताः
स्यादप्यन्ते परमपरिशुद्धं परं धाम विष्णोः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे त्रयोविंशः पटलः ॥

चतुर्विंशः पटलः ॥

अथ संप्रति विष्णुपञ्जरस्य

प्रतिवक्ष्यामि समासतो विधानम् ।

जितवांस्त्रिपुरं हरोऽपि येन

त्रिदशानामधिपो वलासुरं च ॥ १ ॥

शक्तेर्द्वादशगुणिते

यन्त्रे मन्त्राणि मण्डलान्यपि च ।

बीजानि यानि चोक्ता-

न्येभिः क्लृप्तं तु पञ्जरं विष्णोः ॥ २ ॥

विष्णुं लिखेन्मध्यगशक्तिबिन्दौ

कपोलयोः सिंहवराहबीजे ।

तद्विश्वरूपाह्वयमन्त्रवीतं

प्रवेष्टयेत्षोडशमन्त्रवर्णैः ॥ ३ ॥

तारं हृदयं भगव-
त्पदं महाविष्णुवासुदेवौ ङेन्तौ ।
विश्वादिरूप शरणं
भव मे प्रभविष्णवे [1]नमस्यामन्त्रः ॥ ४ ॥

द्वादशाक्षरमन्त्रान्ते भवेतां कवचास्त्रकौ ।
[2]स्वाहान्तषोडशार्णोऽयं मन्त्रः सर्वार्थसाधकः ॥ ५ ॥

क्रमेण तद्वर्णविकारजाता-
श्चक्रादिकाः षोडश मूर्तयः स्युः ।
याभिस्तु विष्णोरिह पञ्जरस्य
प्रवर्तते शक्तिरनेकरूपा ॥ ६ ॥

यन्त्रस्य बीजेषु चतुर्षु पूर्वं
प्राग्दक्षिणप्रत्यगुदग्गतेषु ।
विद्वांस्तु चक्रं च गदां च शार्ङ्गं
खड्गं च मन्त्रैः सहितं विलिख्यात् ॥ ७ ॥

शङ्खहलमुसलशूला-
न्यग्न्याद्यश्रिष्वथाष्टबीजेषु ।

---

1. नमस्येमन्त्रः. 2. स्वाहान्ते.

विलिखेद्दण्डं कुन्तं शक्तिं
पाशाङ्कुशं कुलिशशतमुखवह्नीन् ॥ ८ ॥

सप्रणवहृदयभगव-
द्विष्णुस्वाख्यानमूर्तिधरयुक्ताः ।
सेनापतिसहिता निज-
मन्त्रान्ता मूर्तयोऽत्र लिखितव्याः ॥ ९ ॥

सहस्रारपदं पूर्वं कौमोदकि ततो भवेत् ।
महाशार्ङ्गपदं पश्चान्महाखड्गपदं पुनः ॥ १० ॥

प्रोक्तानि वर्मास्त्रान्तानि निजमन्त्राणि वै क्रमात् ।
पूर्वं महापाञ्चजन्यं महाहलमनन्तरम् ॥ ११ ॥

ततो महामुसलकं महाशूलं ततः परम् ।
स्वाहान्तानि च मन्त्राणि शङ्खादीनां क्रमाद्विदुः ॥१२॥

दण्डादीनामथाष्टानामन्ते युञ्ज्यान्नमःपदम् ।
पोत्रोद्धृतधरं विद्वान्वाराहं विष्णवभिख्ययोः ॥ १३ ॥

अन्तरा योजयेन्मन्त्री नारसिंहं पुनः सुधीः ।
नखं च दलितं चैव रिपुविग्रहमेव च ॥ १४ ॥

योजयित्वा नृसिंहात्प्राक् सिंहमन्त्रं समापयेत् ।
विष्णोरन्ते महापक्षिराजाय च गरुत्मते ॥ १५ ॥

हरिपूर्वं वाहनाय प्राणात्मन इतीरयेत् ।
नमोऽन्तोऽसौ तु विद्वद्भिर्मन्त्रो गारुत्मतो मतः ॥१६॥

स त्रिष्टुभा वह्निगृहेण पूर्वं
सानुष्टुभेन्दोर्निलयेन चापि ।
गायत्रिमन्त्रोल्लसितेन भूयः
प्रवेष्टयेदर्कनिकेतनेन ॥ १७ ॥

अनुलोमविलोमगैश्च वर्णै-
रभिवीतं वसुधापुरद्वयेन ।
नलिनं बहिरष्टयुग्मपत्रं
प्रविदध्यादथ मूर्तिमन्त्रयुक्तम् ॥ १८ ॥

तद्बाह्यमण्डलं सर्वलक्षणैरभिलक्षितम् ।
तस्मिन्नावाह्य विधिवद्विश्वरूपहरिं यजेत् ॥ १९ ॥

अग्नीषोमात्मकमरिगदाशार्ङ्गखड्गैः सशङ्खै-
रुद्यद्बाहुं हलमुसलशूलैः सकुन्तैः सदण्डैः ।

शक्त्या पाशाङ्कुशकुलिशटङ्काग्निभिश्चार्कवह्नि-
द्योतद्वक्त्राङ्घ्रिकसरसिजं तप्तकार्तस्वराभम् ॥

विष्णुं भास्वत्किरीटं [1]मणिमकुटकटीसूत्रकेयूरहार-
ग्रैवेयोर्म्यादिमुख्याभरणमणिगणोल्लासिदिव्याङ्गरागम् ।
विश्वाकाशावकाशप्रविततमयुतादित्यनीकाशमुद्य-
द्द्वाह्मप्रव्यग्रनानायुधनिकरकरं विश्वरूपं नमामि ॥

अभ्यर्च्य पूर्ववत्पीठं नवशक्तिसमन्वितम् ।
अर्चयेत्क्रमशो विद्वान्मूर्तिशक्तिचतुष्टयम् ॥ २२ ॥

चक्रं च चक्राङ्ककिरीटमौलिं
सचक्रशङ्खं सगदं सशार्ङ्गम् ।
रक्ताम्बरं रक्ततनुं कराल-
दंष्ट्राननं प्राग्दलकेऽर्चयीत ॥ २३ ॥

पूज्या गदा गदाङ्कित-
मौलिः सगदा सचक्रशङ्खधनुः ।
पीताम्बरानुलेपा
पीता क्रुद्धा च याम्यसंस्थदले ॥ २४ ॥

---

1. मणिकटक०

श्यामं शार्ङ्गाङ्कितकं
शार्ङ्गं शार्ङ्गारिदरगदाहस्तम् ।
रक्तांशुकानुलेपन-
माल्यादिं वारुणे यजेत्पत्रे ॥ २५ ॥

खड्गं सखड्गशिरसं
खड्गारिगदाधनुष्करं धूम्रम् ।
विकृताम्बरानुलेप-
स्रजं समभ्यर्चयेदुदक्पत्रे ॥ २६ ॥

शङ्खं सशङ्खशिरसं
शङ्खारिगदाधनुष्करं सुसितम् ।
सितवसनमाल्यभूषं
यजेन्महानादमग्निसंस्थदले ॥ २७ ॥

शङ्खोक्तचिह्नभूषा-
न्स्वास्त्रादिकधरचतुर्भुजानपरान् ।
हलमुसलशूलसंज्ञा-
न्यजेन्निशाटादिकेषु पत्रेषु ॥ २८ ॥

दण्डादिकांस्तथाष्टौ
छिद्रदलेष्वर्चयीत रक्ताभान् ।
स्वस्वायुधप्रधानां-
श्चतुर्भुजाञ्शतमुखानलान्तांश्च ॥ २९ ॥

दंष्ट्राग्रलग्नवसुधं सजलाम्बुवाह-
[1]घोरार्चिषं त्वभियजेदधरेऽष्टबाहुम् ।
चक्रासिबाणसगदादरचर्मशार्ङ्ग-
शक्त्याख्यकान्दधतमादिमहावराहम् ॥ ३० ॥

अर्कानलोज्ज्वलमुखं नयनैस्त्रिभिश्च
वह्निं क्षरन्तमवधूतसटाकलापम् ।
शुक्लाभभूषमरिशङ्खगदासिबाहुं
भूयोऽभिराधयतु खे च महानृसिंहम् ॥ ३१ ॥

अग्रे समग्रबलमुग्रतनुं स्वपक्ष-
विक्षेपविक्षतविलक्षविपक्षपक्षम् ।
खण्डाग्रतुण्डममुमण्डजदण्डनाथ-
माराधयेदथ च पञ्जरगस्य विष्णोः ॥ ३२ ॥

---

1. घोरत्विषं.

भूयोऽपि केशवेन्द्रा-
दिकौ समभ्यर्चयेच्च वज्रादीन् ।
गन्धादिभिरुपचारैः
पञ्चभिरथ संयतात्मको मन्त्री ॥ ३३ ॥

निवेदिते होमविधिश्च कार्यो
दीक्षाविधानाभिहितश्च वह्नौ ।
ससर्पिषान्नेन तु वह्निमूर्तिं
हुत्वा तु विष्णोर्मनुना तथैव ॥ ३४ ॥

जुहुयाच्च [1]वामदेवा-
दिकशान्त्यादींश्च रुद्रसंख्येन ।
दुग्धतरूत्थाः समिधः
क्रमेण चक्रादिभिश्चतुर्मन्त्रैः ॥ ३५ ॥

जुहुयादष्टोर्ध्वशतं
संख्यातैर्द्वादशभिरथ मनुभिः ।
तिलसिद्धार्थैर्जुहुया-
द्विकारसंख्यं पृथक्पृथङ्मन्त्री ॥ ३६ ॥

---

1. वासुदेवा.

त्रिष्टुबनुष्टुप्सप्तपद-
मन्त्रैर्मन्त्रार्णसंख्यकं हविषा ।
सघृतेन केशवाद्यै-
र्दिनकरसंख्यं तथेन्द्रवज्राद्यैः ॥
जुहुयात्पृथगपि वसुमित-
मथ च महाव्याहृतीर्हुनेन्मतिमान् ॥ ३७ ॥

आराध्य च विसृज्याग्निमभिषिच्य सुसंयतः ।
विष्णोस्तु पञ्जरं कुर्यादृषिर्ब्रह्मबृहस्पती ॥ ३८ ॥

छन्दस्त्वनुष्टुप् त्रिष्टुप् च मुनिभिः समुदाहृते ।
विश्वरूपादिको विष्णुर्विष्णुपञ्जरदेवता ॥ ३९ ॥

अष्टार्णचक्रमनुमध्यगतैश्च पादै-
र्व्यस्तैस्तथा सुमतिरारचयेत्समस्तैः ।
गीतामनोः क्रमश एव च जातियुग्भि
पञ्चाङ्गकानि हरिपञ्जरकल्पितानि ॥ ४० ॥

वैष्णुः प्राच्यादिकमथ जपेन्नारसिंहोऽम्बरान्तं
त्रिस्त्रिर्मन्त्रान्पुनरपि तथा पञ्चशस्त्वेकविंशत् ।

बुद्धिस्वास्थ्यप्रभृति च तथा पञ्चवारं त्रिगाधा
भूयो जप्याद्विमलशितधीश्चक्रमन्त्राभिधानम् ॥ ४१ ॥

नमो भगवते सर्वविष्णवे विश्वरूपिणे ।
वासुदेवाय चक्रादिसर्वायुधभृते नमः ॥ ४२ ॥

अर्केन्दुवह्निनिलयस्फुरितत्रिमन्त्र-
[1]शक्तिप्रबन्धमहसः परमस्य विष्णोः ।
पादारविन्दगलितामृतासिक्तगात्रं
साध्यं स्मरेज्जपविधावपि साधकेशः ॥ ४३ ॥

विष्णोः सांनिध्यलब्धोल्लसितबलचलद्धस्तदण्डोद्यतास्त्रै-
श्चक्राद्यैर्भीषणास्येक्षणचरणवचोहासहुंकारघोरैः ।
उत्क्षिप्ताक्षिप्तकृत्तस्फुटितविगलिताघूर्णितध्वस्तशान्ता
ध्यायेद्वेतालभूतग्रहदुरितपिशाचारिनागारिरोगान् ॥

पूर्वं स्थाने हृषीकेशमन्त्रयुक्तं विधानवित् ।
विश्वरूपात्मकं जप्याद्वैष्णवं मूलमन्त्रकम् ॥ ४५ ॥

योजयित्वा जपेत्पश्चाच्चक्रादिषु यथाक्रमम् ।
चतुर्षु चतुरः पादान्गीतान्त्रिष्टुप्समुद्भवान् ॥ ४६ ॥

---

1. शक्तिप्रवृद्ध०

पूर्णेषु षोडशेष्वेवमाद्यं पादे वराहके ।
द्वितीयान्नारसिंहे च द्वितीयं गारुडे पुनः ॥ ४७ ॥

चतुर्थं च क्रमं ते च योजयित्वा जपेत्सुधीः ।
मन्त्रं सुदर्शनं चेत्थमिष्टमष्टादशं मनुम् ॥ ४८ ॥

संयोज्य कृच्छ्रे महति जपेन्मन्त्री विधानवित् ।
आग्नेये वक्ष्यमाणेन विधानेन समाहितः ॥ ४९ ॥

सिकतोपलसर्वादीन्साधयेदथ तैः क्रियाः ।
वास्तौ पुरे वा ग्रामे वा विदध्याद्विषयेऽपि वा ॥ ५० ॥

मध्ये च षोडशाशान्ते खनेदष्टादशावटान् ।
अष्टादशं तु शक्रस्य विदध्यात्पुरतोऽवटम् ॥ ५१ ॥

हस्तागाधांस्तथायामांश्चतुरश्रान्समन्ततः ।
अन्योन्यतश्चङ्क्रमार्थं शुद्धान्मार्गान्विधाय च ॥ ५२ ॥

गोमयेनोपलिप्येत नारीयस्थाप्यवस्त्वपि ।
शुष्कपुष्करपत्रेषु विदध्याद्विंशतिष्वपि ॥ ५३ ॥

ततो मध्यमकुण्डस्य प्रविश्य पुरतो गुरुः ।
तदन्तरिष्ट्वा पीठं च तत्र यन्त्रमनुस्मरन् ॥ ५४ ॥

स्थापयेद्वैष्णवे स्थाने विश्वरूपधिया सुधीः ।
ततः क्रमेण चक्रादीन्दिक्कुण्डेषु चतुर्ष्वपि ॥ ५५ ॥

पुनः शङ्खादिकांस्तद्वत्कुण्डेष्वश्राश्रितेष्वपि ।
तथा दण्डादिकानष्टौ च्छिद्राशासु प्रकल्पयेत् ॥ ५६ ॥

मध्ये पुनरधश्चोर्ध्वं कोलकेसरिणौ यजेत् ।
चक्रस्य प्राक्तने कुण्डे स्थापयेद्विनतासुतम् ॥ ५७ ॥

ततः समस्थलीकृत्य क्रमात्समुपलिप्य च ।
प्रत्यगानन आसीनो मध्यगस्थण्डिलस्थिते ॥ ५८ ॥

यन्त्रे काञ्चनपत्रस्थे पूजयेत्पूर्ववत्प्रभुम् ।
वादित्रघोषबहुलं निवेद्यान्तं यथाक्रमम् ॥ ५९ ॥

हुनेच्च पूर्वसंदिष्टैर्द्रव्यैः पूर्वोक्तमार्गतः ।
आशोपाशान्तराशासु बलिं दद्यात्त्रिशस्त्रिशः ॥ ६० ॥

क्रमाच्चक्रादिमूर्तीनां पञ्चपूरान्धसा सुधीः ।
तत उद्वास्य देवेशं पूजां प्रतिसमाप्य च ॥ ६१ ॥

दत्वा सुवर्णं वासांसि गुरवे ब्राह्मणानपि ।
संतर्प्य विभवैः सम्यग्भोजयेद्देवताधिया ॥ ६२ ॥

तत्रोपसर्गा नश्यन्ति नरनारीमहीभृताम् ।
ग्रहक्षुद्रपिशाचाद्या नेक्षन्ते तां दिशं भयात् ॥ ६३ ॥

अश्मपातादिका ये च भया नश्यन्ति ते चिरात् ।
सस्यर्द्धिर्गोसमृद्धिश्च प्रजावृद्धिश्च जायते ॥ ६४ ॥

धनधान्यसमृद्धिश्च वर्धते तत्कुलं क्रमात् ।
दारिद्र्यरोगनिर्मुक्तं सुखमाभूतसंप्लवम् ॥ ६५ ॥

रक्षोभिरक्षितबलैरसुरैश्च दैत्यैः
सर्वैः समुद्धृतमहास्त्रकरैः परीतम् ।
विष्णोस्तु पञ्जरमिदं प्रभजन्तमव्या-
त्साक्षादपीन्द्रमपरत्र नरे कथा का ॥ ६६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे चतुर्विंशः पटलः ॥

पञ्चविंशः पटलः ॥

अथाभिधास्यामि मनुं समासा-
त्प्रासादसंज्ञं जगतो हिताय ।
येन प्रजप्तेन तथार्चितेन
हुतेन सिद्धिं लभते यथेष्टम् ॥ १ ॥

प्रसादनत्वान्मनसो यथाव-
त्प्रासादसंज्ञास्य मनोः प्रदिष्टा ।
अन्त्यात्तृतीयः प्रतिलोमतः स्या-
दनुग्रहार्धेन्दुयुतश्च मन्त्रः ॥ २ ॥

ऋषिरस्य वामदेवः
पङ्क्तिश्छन्दोऽस्य देवतेशः स्यात् ।
तेनैवाङ्क्तीबकला-
दीर्घयुजाङ्गानि तस्य बीजेन ॥ ३ ॥

शूलाही टङ्कघण्टासिसृणिकुलिशपाशाग्न्यभीतीर्दधानं
दोर्भिः शीतांशुखण्डप्रतिघटितजटाभारमौलिं त्रिणेत्रम् ।
नानाकल्पाभिरामापघनमभिमतार्थप्रदं सुप्रसन्नं
पद्मस्थं पञ्चवक्त्रं स्फटिकमणिनिभं पार्वतीशं नमामि ॥

ईशानादीन्मन्त्रवित्पञ्च मन्त्रा-
नङ्गुष्ठादिष्वङ्गुलीषु क्रमेण ।
न्यस्येदृग्भिर्व्युत्क्रमाद्व्योमगाभि-
र्ह्रस्वाख्याभिस्ताभिरेवाङ्गुलीभिः ॥ ५ ॥

ईशानस्तत्पुरुषो-
ऽघोराख्यो वामदेवसंज्ञश्च ।
सद्योजाताह्वय इति
मन्त्राणां देवताः क्रमात्पञ्च ॥ ६ ॥

मूर्धाननहृद्गुह्यक-
पादेषु च नामभिः स्वबीजाद्यैः ।
ऊर्ध्वप्राग्दक्षोद-
क्पश्चिमगेष्वाननेषु विन्यस्येत् ॥ ७ ॥

प्रतिपाद्य निजं शरीरमेवं
　　प्रजपेदिन्द्रियलक्षकं शिवात्मा ।
जुहुयाच्च दशांशतस्तदन्ते
　　मधुराक्तैः करवीरजप्रसूनैः ॥ ८ ॥

अथ वा कुसुमैर्जपासमुत्थैः
　　कमलैर्वा विमलेन पायसेन ।
नृपवृक्षभवैः समिद्वरैर्वा
　　जुहुयात्साधकसत्तमः समृद्ध्यै ॥ ९ ॥

अष्टपत्रगुणवृत्तराशिभि-
　　र्वीथिकल्पतरुभिः समावृतम् ।
मण्डलं प्रतिविधाय शूलिनः
　　पीठमत्र नवशक्तिभिर्यजेत् ॥ १० ॥

वामा ज्येष्ठा रौद्री
　　काल्या कलबलाद्यविकलिन्यौ ।
सबलप्रमथिनिसर्वभूत-
　　दमन्यौ मनोन्मनीं च यजेत् ॥ ११ ॥

तारादिकं नतिमपि
प्रोक्त्वा भगवत्पदं चतुर्थ्यन्तम् ।
सकलगुणात्मपदान्ते
शक्ति युक्ताय चेति संभाष्य ॥ १२ ॥

भूयोऽनन्तायेति च
योगान्ते पीठमात्मने चेति ।
नमसा युक्तं ब्रूया-
त्पीठाख्योऽयं मनुः समुद्दिष्टः ॥ १३ ॥

न्यासक्रमेण देहे
मन्त्री गन्धादिकमपि पूज्य ।
पूर्वोक्तदिक्षु मूर्तीर्विदिक्षु
सनिवृत्तिपूर्विकाश्च यजेत् ॥ १४ ॥

सद्यो वेदाक्षमालाभयवरदकरः कुन्दमन्दारगौरो
वामः काश्मीरवर्णोऽभयवरदपरश्चाक्षमालाविलासी ।
अक्षस्रग्वेदपाशाङ्कुशडमरुकखट्वाङ्गशूलान्कपालं
बिभ्राणो भीमदंष्ट्रोऽञ्जनरुचिरतनुर्भीतिदश्चाप्यघोरः ॥

विद्युद्वर्णोऽथ वेदाभयवरदकुठारान्दधत्पूरुषाख्यः
प्रोक्ताः सर्वे त्रिणेत्रा विधृतमुखचतुष्काश्चतुर्बाहवश्च ।
मुक्तागौरोऽभयेष्टाधिककरकमलोऽघोरतः पञ्चवक्त्र-
स्त्वीशो ध्येयोऽम्बुजन्मोद्भवमुररिपुरुद्रेश्वराः स्युः शिवान्ताः ॥

भूतानां शक्तित्वा-
द्व्याप्तित्वाज्जगति वा निवृत्त्याद्याः ।
तेजोरूपाः करपद-
वर्णविहीना मनीषिभिः प्रोक्ताः ॥ १७ ॥

अनन्तसूक्ष्मौ च शिवोत्तमश्च
तथैकपूर्वावपि नेत्ररुद्रौ ।
त्रिमूर्तिश्रीकण्ठशिखण्डिनश्च
प्रागादिपत्रेषु समर्चनीयाः ॥ १८ ॥

शूलाशनिशरचापो-
ल्लासितदोर्दण्डभीषणाः सर्वे ।
पद्मासनाश्च नाना-
विधभूषणभूषितास्त्रिणेत्राः स्युः ॥ १९ ॥

पाटलपीतसितारुण-
शितिरक्तशशिप्रभाश्च धूम्रान्ताः ।
कोटीरघटितविलस-
च्छशिशकलयुताश्च मूर्तयः क्रमशः ॥ २० ॥

उमा चण्डेश्वरो नन्दी महाकालो गणेश्वरः ।
वृषो भृङ्गिरिटिः स्कन्दः संपूज्याश्चोत्तरादितः ॥ २१ ॥

कनकविडूरजविद्रुम-
मरतकमुक्तासिताच्छरक्ताभाः ।
पद्मासनसंस्थाश्च
क्रमादुमाद्या गुणान्तिकाः प्रोक्ताः ॥ २२ ॥

पुनराशेशास्तदनु च
कुलिशाद्यादिक्रमेण संपूज्याः ।
प्रासादविधानमिदं
निगदितमिति सकलवर्गसिद्धिकरम् ॥ २३ ॥

अमुना विधिना महेशपूजां
दिनशो यः कुरुते समाहितात्मा ।

स तु सम्यगवाप्य दृष्टभोगा-
न्परमन्ते परिपूर्णमेति धाम ॥ २४ ॥

वक्ष्यामि शैवागमसारमष्ट-
त्रिंशत्कलान्यासविधिं यथावत् ।
सपञ्चभिर्ब्रह्महरीशपूर्वैः
सन्ध्यादिकैः साङ्गविशेषकैश्च ॥ २५ ॥

ईशोऽनुष्टुब्भूरी-
श्वराः स तत्पुरुषसंज्ञगायत्र्यापः ।
पुनरग्न्यनुष्टुबापो वामदेवः
कतिभर्गहरस्त्वनुष्टुब्भगयुक् ॥ २६ ॥

इन्द्रियतारसमेतं
सर्वज्ञायेति हृच्छिरस्त्वमृते ।
तेजोमालिनिपूर्वं
तृप्ताय ब्रह्मशिरस इति कथितम् ॥ २७ ॥

ज्वलितशिखिशिखेत्य-
नादिबोधाय चान्वितेति शिखा ।

वज्रिणे वज्रधराय
स्वाहास्वतन्त्राय वर्म नेत्रं च ।
[1]सौ सौ ह्रौ बिन्दुयुतं
संप्रोक्त्वा लुप्तशक्तये च तथा ॥ २८ ॥

सश्रीपशुहुंफ-
डनन्तशक्तये तथास्त्रं स्यात् ।
समुनिच्छन्दोदैवत-
युक्तं तदङ्गषट्कमिति कथितम् ॥ २९ ॥

करदेहमुखन्यासं मन्त्रैः पूर्ववदाचरेत् ।
कलाः प्रविन्यसेद्देहे वक्ष्यमाणक्रमेण तु ॥ ३० ॥

ताः स्युः पञ्च चतस्रोऽष्टौ त्रयोदश चतुर्द्वयम् ।
अष्टत्रिंशत्कलाः सम्यङ् न्यस्तव्या मन्त्रवित्तमैः ॥३१॥

दिक्षु प्राग्याम्यवारीवसुपनिजभुवामैन्द्रवारार्किराज्ञां[2]
हृद्ग्रीवांसद्वयीनाभ्युदरचरमवक्षःसु गुह्याङ्घ्रयोश्च ।
स्रोर्वोर्जान्वोः सजङ्घास्फिगुभयकटीपार्श्वपद्दोस्तलेषु
घ्राणे कं बाहुयुग्मेष्वतिविशदमतिर्विन्यसेदङ्गुलीभिः ॥

1. सौ चौ. 2. ०वारार्किराज्ञां

विन्यासः प्रतिमाकृतौ च नितरां सांनिध्यकृत्स्यादयं
देहे चापि शरीरिणां निगदितः सामर्थ्यकारीति च ।
आस्ते यत्र तथामुनैव दिनशो विन्यस्तदेहः पुमा-
न्क्षेत्रं देशममुं च योजनमितं शैवागमज्ञा विदुः ॥

न्यस्यैवं पञ्चभिर्ब्रह्मभिरथ शिवमाराधयेद्दग्भिराभि-
र्मध्यप्राग्याम्यसौम्यापरदिशि पुनरङ्गैरनन्तादिभिश्च ।
अन्यो मार्द्यैर्दिशापैः पुनरपि कुलिशाद्यैर्यजेदेवमुक्तं
पाञ्चब्रह्मं विधानं सकलसुखयशोभुक्तिमुक्तिप्रदं च ॥

पञ्चाक्षरविहितविधिं
वक्ष्ये जपतामभीष्टसिद्धिकरम् ।
सिद्धेन येन देही
प्रेत्येह च वाञ्छितं फलं लभते ॥ ३५ ॥

[1]मेषो विषो विसर्गी
मृत्युः साक्षी सवाक्षरः पवनः ।
ताराद्भवति यदस्मा-
त्तदादिरभिधीयते मनुप्रवरः ॥ ३६ ॥

---

1. दीर्घाविषो

अस्याक्षराण्यमूनि च
पञ्च स्युः पञ्चभूतगानि तथा ।
जगदपि भूतारब्धं
तेन हि जगदात्मतोदितास्य मनोः ॥ ३७ ॥

प्रोक्तमृष्यादिकं पूर्वमङ्गवर्णैस्तु मन्त्रकैः ।
अङ्गुलीदेहवक्त्रेषु मूलमन्त्राक्षरादिकान् ॥ ३८ ॥

न्यसेत्तत्पुरुषाघोरसद्योवामेशसंज्ञकान् ।
सतर्जनीमध्यमान्त्यानामिकाङ्गुष्ठकेषु च ॥ ३९ ॥

वक्त्रहृत्पादगुह्याख्यमूर्धस्वपि च नामभिः ।
प्राग्याम्यवारुणोदीच्यवक्त्रेष्वपि च मूर्धसु ॥ ४० ॥

बिभ्रद्दोर्भिः कुठारं मृगमभयवरौ सुप्रसन्नो महेशः
सर्वालंकारदीप्रः सरसिजनिलयो व्याघ्रचर्मात्तवासाः ।
ध्येयो मुक्तापरागामृतरसकलिताद्रिप्रभः पञ्चवक्त्र-
स्त्र्यक्षः कोटीरकोटीघटिततुहिनरोचिष्कलोत्तुङ्गमौलिः ॥

अक्षरलक्षचतुष्कं
जप्यात्तावत्सहस्रमपि जुहुयात् ।

शुद्धैस्तिलैर्घृतैर्वा
दुग्धान्नैर्दुग्धभूरुहेध्मैर्वा ॥ ४२ ॥

तत्पुरुषाद्याः सर्वे
प्रधानसंप्रोक्तबाहुहेतियुताः ।
चञ्चासिमुखचतुष्का-
स्तेजोरूपो विलक्षणस्त्वीशः ॥ ४३ ॥

आवृतिराद्या मूर्तिभि-
रङ्गैरन्या पराप्यनन्ताद्यैः ।
अपरोमादिभिरपरे-
न्द्राद्यैरपरा तदायुधैः प्रोक्ता ॥ ४४ ॥

कथयामि मनोविधानमन्य-
न्मुनिपूज्यं प्रवरं पिनाकपाणेः ।
स्वतनौ परिकल्प्य पीठमङ्गा-
न्यपि विन्यस्य तथैव मन्त्रवर्णान् ॥ ४५ ॥

हृन्मुखांसोरुयुग्मेषु षड्वर्णान्क्रमतो न्यसेत् ।
[1]कर्णमूले तथा नाभौ पार्श्वयुक्पृष्ठहृत्सु च ॥ ४६ ॥

1. कण्ठमूले.

मूर्धास्यनेत्रघ्राणेषु दो:पत्संध्यग्रकेषु च ।
सशिरोवक्त्रहृदयजठरोरुपदेष्वपि ॥ ४७ ॥

हृदाननपरश्वेणाभीत्याख्यवरदेषु च ।
मुखांसहृदयेषु त्रीन्पदान्पादोरुकुक्षिषु ॥ ४८ ॥

ऊर्ध्वाध:क्रमतो[1] न्यस्येद्गोलकान्यासमुत्तमम् ।
पुनस्तत्पुरुषाघोरसद्योवामेशसंज्ञकान् ॥ ४९ ॥

ललाटव्यंसजठरहृदयेषु क्रमान्न्यसेत् ।
पुनस्तत्प्रतिपत्त्यर्थं जपेन्मन्त्रमिमं सुधी: ॥ ५० ॥

नमोऽस्तु स्थाणुभूताय ज्योतिर्लिङ्गावृतात्मने ।
चतुर्मूर्तिवपुश्छायाभासिताङ्गाय शंभवे ॥ ५१ ॥

कुर्यादनेन मन्त्रेण निजदेहे समाहित: ।
मन्त्री पुष्पाञ्जलिं सम्यक्त्रिश: पञ्चश एव वा ॥ ५२ ॥

पूर्वोक्त एव पीठे
प्रागङ्गैर्मूर्तिशक्तिभिस्तदनु ।

---

1. क्रमशः कुर्यात्.

वृषपालचण्डदुर्गा-
गुहनन्दिगणपसैन्यपाः पूज्याः ॥ ५३ ॥

अन्या च वासवाद्यैः
पुनरुपहारैः क्रमेण भक्तिमता ।
अभ्यर्चिते हुते च
स्तोतव्यः संस्तवेन पुनरीशः ॥ ५४ ॥

नमो विरिञ्चविष्णवीशभेदेन परमात्मने ।
सर्गसंस्थितिसंहारव्यावृत्तिव्यक्तवृत्तये ॥ ५५ ॥

नमश्चतुर्धा प्रोद्भूतभूतभूतात्मने भुवः ।
भूरिभारार्तिसंहर्त्रे भूतनाथाय शूलिने ॥ ५६ ॥

विश्वग्रासाय विलसत्कालकूटविषाशिने ।
तत्कलङ्काङ्कितग्रीवनीलकण्ठाय ते नमः ॥ ५७ ॥

नमो ललाटनयनप्रोल्लसत्कृष्णवर्त्मने ।
ध्वस्तस्मरनिरस्ताधियोगिध्याताय शंभवे ॥ ५८ ॥

नमो देहार्धकान्ताय दग्धदक्षाध्वराय च ।
चतुर्वर्गेष्वभीष्टार्थदायिने मायिनेऽणवे ॥ ५९ ॥

स्थूलाय मूलभूताय शूलदारितविद्विषे ।
कालहन्त्रे नमश्चन्द्रखण्डमण्डितमौलये ॥ ६० ॥

विवाससे कपर्दान्तभ्रान्ताहिसरिदिन्दवे ।
देवदैत्यासुरेन्द्राणां मौलिघृष्टाङ्घ्रये नमः ॥ ६१ ॥

भस्माभ्यक्ताय भक्तानां भुक्तिमुक्तिप्रदायिने ।
व्यक्ताव्यक्तस्वरूपाय शंकराय नमो नमः ॥ ६२ ॥

नमोऽन्धकान्तकरिपवे पुरद्विषे
नमोऽस्तु ते द्विरदवराहभेदिने ।
विषोल्लसत्फणिकुलबद्धमूर्तये
नमः सदा वृषवरवाहनाय ते ॥ ६३ ॥

वियन्मरुद्धुतवहवार्वसुंधरा-
मखेशरव्यमृतमयूखमूर्तये ।
नमः सदा नरकभयावभेदिने
भवेह नो भवभयभङ्गकृद्विभो ॥ ६४ ॥

स्तुत्वेन्दुखण्डपरिमण्डितमौलिमेव-
मुद्वासयेत्पुनरमुं हृदयाम्बुजे स्वे ।

अभ्यर्च्य देवमभिसंयतचित्तवृत्ति-
भूत्वा शिवो जपतु मन्त्रमहेशमेनम् ॥ ६५ ॥

संतर्प्य विप्रान्पुनरेवमेव
संपूजयेदिन्दुकलावतंसम् ।
जपेद्यथाशक्ति शिवस्वरूपी
भूत्वा ततोऽन्ते च शिवः स भूयात् ॥ ६६ ॥

अमुमेव मनुं लक्षं
मन्त्री हृल्लेखयाभिसंरुद्धम् ।
जप्त्वा नृपतरुसमिधां
मधुरयुजां मनुसहस्रकं जुहुयात् ॥ ६७ ॥

वन्दे हरं वरदशूलकपालहस्तं
साभीतिमद्रिसुतयोज्ज्वलदेहकान्तिम् ।
वामोरुपीठगतया निजवामहस्त-
न्यस्तारुणोत्पलरुचा परिरब्धदेहम् ॥ ६८ ॥

आवृतिरङ्गैराद्या
हृल्लेखाद्याभिरनु वृषाद्यैश्च ।

मात्राशेशैरुक्तं
पञ्चावरणं विधानमीशस्य ॥ ६९ ॥

आप्यायिनी शशियुताप्यरुणाग्निमाया
बिन्द्वन्तिका चलकुलीभुवनेन्दुयुक्ता ।
दीर्घाकलायुतशिवश्च शिवायवर्णा-
स्याच्छूलिनो मनुरयं वसुवर्णयोगी ॥ ७० ॥

वामाङ्कन्यस्तवामेतरकरकमलायास्तथा वामबाहु-
न्यस्तारक्तोत्पलाया: स्तनविधृतिलसद्वामबाहु: प्रियाया: ।
सर्वाकल्पाभिरामो धृतपरशुमृगेष्ट: करै: काञ्चनाभो
ध्येय: पद्मासनस्थ: स्मरललिततनु: संपदे पार्वतीश: ॥

पञ्चार्णोक्ताङ्गाद्य:
पञ्चब्रह्मप्रदिष्टपूजश्च ।
वसुमितलक्षजपोऽयं
मन्त्रस्तावत्सहस्रहोमश्च ॥ ७२ ॥

इति जपहुतपूजाध्यानकैरीशयाजी
प्रियतरचरित: स्यात्सर्वतो देहभाजाम् ।

धनविभवयशःश्रीसंपदा दीर्घजीवी
तनुविपदि च शैवं तत्परं धाम भूयात् ॥ ७३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे पञ्चविंशः पटलः ॥

षड्विंशः पटलः ॥

अथ प्रवक्ष्यते मन्त्रो दक्षिणामूर्तिसंज्ञकः ।
जपतामिष्टसंसिद्धिविधानसुरपादपः ॥ १ ॥

अत्रिः क्षिणा कालकर्णकामिकायुग्मयेक्षराः ।
तुध्यामध्यगताः स्युर्भ्यं वटमूलनिवासिने ॥ २ ॥

नैधातृनिरताङ्गाय नमो रुद्राय शंभवे ।
तारशक्तिनिरुद्धोऽयं मन्त्रः षट्त्रिंशदक्षरः ॥ ३ ॥

शुकः प्रोक्तो मुनिश्छन्दोऽनुष्टुप्च समुदाहृतम् ।
दक्षिणामूर्तिरुद्रोऽस्य देवता समुदीरिता ॥ ४ ॥

तारशक्त्यादिकैर्हाङ्गाद्यन्तैर्मन्त्राक्षरैः क्रमात् ।
ऋत्वक्षिवसुवस्वग्निगुणवर्णैर्विभागशः ॥ ५ ॥

मन्त्री कुर्यात्षडङ्गानि जातियुञ्जि समाहितः ।
कालिकश्रुतिदृग्गण्डद्वयनासास्यके दश ॥ ६ ॥

दो:संधिकण्ठस्तनहृन्नाभिकट्यन्धुषु क्रमात् ।
पत्संधिषु पुनर्द्वाभ्यां मन्त्रविद्व्यापकं न्यसेत् ॥
एवं न्यस्तशरीरोऽथ चिन्तयेन्मन्त्रदेवताम् ॥ ७ ॥

मुद्रां भद्रार्थदात्रीं सपरशुहरिणां बाहुभिर्बाहुमेकं
जान्वासक्तं दधानो भुजगवरसमाबद्धकक्ष्यो वटाधः ।
आसीनश्चन्द्रखण्डप्रतिघटितजटः क्षीरगौरस्त्रिणेत्रो
दद्यादाद्यैः शुकाद्यैर्मुनिभिरभिनुतो भावशुद्धिं भवो वः ॥

प्राक्प्रोक्तविधानेन च
सम्यक्संपूज्य साधु कलशाद्यैः ।
कृतसंदीक्षो मन्त्री
जप्यादेनं मनुं समाहितधीः ॥ ९ ॥

द्वात्रिंशदयुतमानं
जप्याच्च जुहोतु तद्दशांशमितैः ।
दुग्धाप्लुतैस्तिलैर्वा
साज्येन पयोन्धसा द्वयेनापि ॥ १० ॥

जप्त्वैवं मन्त्रमेनं दिनमनु गिरिशं पूजयित्वा च हुत्वा
नत्वा स्तुत्वा मनोवाक्तनुभिरवहितः प्राप्य कामानशेषान् ।
व्याख्याता चागमानां भुवि कविषु वरः साधु वेदान्तवेदी
वादीट् सोऽद्वैतविद्याविमलतरमतिर्याति शैवं पदं तत् ॥

जीवशिखिकर्णरेफा-
न्प्रतिवीप्स्य प्रादिकांश्च पुनरपि तान् ।
मेधाप्यायिनियान्तां-
स्तानेव तरान्तिकान्सतनुरूपान् ॥ १२ ॥

आभाष्य चटप्रचटौ
सकहवमौ बन्धघातयौ वीप्स्य ।
प्रोक्त्वा वर्मास्त्रावधि
समुद्धरेच्छक्तिपूर्वकं मन्त्रम् ॥ १३ ॥

ऋषिरस्याघोराख्यः
संप्रोक्तस्त्रिष्टुबुच्यते च्छन्दः ।
रुद्रोऽप्यघोरपूर्वः
समीरितो देवता तथास्य मनोः ॥ १४ ॥

हृत्पञ्चभिस्तदर्णैः
  शिरो हि षड्भिः शिखा तथा दशभिः ।
तावद्भिरेव कवचं
  दृगष्टभिर्द्वादशभिरपि चास्त्रम् ॥ १५ ॥

कदृगास्यकण्ठहृन्ना-
  भ्यन्धूरुषु जानुजङ्घयोः पदयोः ।
एकादशधा भिन्नै-
  र्मन्त्रार्णैर्न्यसतु विग्रहे मन्त्री ॥ १६ ॥

पञ्चभिरथो सषड्भि-
  र्द्वाभ्यामप्यष्टभिश्चतुर्भिश्च ।
षड्भिश्चतुस्त्रयेण च
  षड्भिर्द्वाभ्यां च भेदितैः क्रमशः ॥ १७ ॥

कालाभ्राभः कराग्रैः परशुडमरुकौ खड्गखेटौ च बाणे-
  ष्वासौ शूलं कपालं दधदतिभयदो भीषणास्यस्त्रिणेत्रः ।
रक्ताकाराम्बरो हि प्रवरघटितगात्रोऽरिनागग्रहादी-
  न्खादन्निष्टार्थदायी भवदनभिमतच्छित्तये स्यादघोरः ॥

स्वच्छो मुमुक्षोस्तु भवेदघोरः
काम्यक्रियायामपि रक्तवर्णः ।
कृष्णोऽभिचारे ग्रहवैकृते च
प्रोक्तो जपः स्यादपि लक्षमानम् ॥ १९ ॥

घृतावसिक्तैस्तिलतण्डुलैश्च
जयावसाने जुहुयाद्दशांशम् ।
घृतप्लुतैर्वाथ हविर्भिरेवं
तावत्प्रजुह्वन्समुपैति कामान् ॥ २० ॥

हृल्लेखास्थितसाध्या-
क्षरविलसत्कर्णिकं कलावीतम् ।
वर्गाष्टकात्तकेसर-
मन्त्ये सहळक्षयाक्षरोल्लसितम् ॥ २१ ॥

मन्त्राक्षरत्रयोद्य-
द्दलमध्यदलाग्रकं च तद्बाह्ये ।
वह्निपुटाश्रिसामाश्रित-
कवचास्त्रं प्रतिविलिख्य यन्त्रमिदम् ॥ २२ ॥

कृत्वा समाप्य मण्डल-
मत्र विनिक्षिप्य पूरयेत्कलशम् ।
पीठे पिनाकपाणे-
र्गव्यैर्वा क्काथकल्पतोयैर्वा ॥ २३ ॥

अङ्गावृतेरनु च हेतिभिरीरिताभिः
पश्चाच्च मातृभिरथापि दिशाधिनाथैः ।
संपूजयीत विधिनेति षडक्षरोक्त-
मार्गेण वा मनुपरिस्फुरणाय मन्त्री ॥ २४ ॥

आज्यापामार्गसमि-
त्तिलसर्षपपायसाज्यकैश्च पृथक् ।
रात्रौ सहस्रहोमा-
द्भूतद्रोहादिशान्तिरुद्दिष्टा ॥ २५ ॥

सितकिंशुकनिर्गुण्डी-
कनकापामार्गजन्मनां समिधाम् ।
पृथगपि सहस्रहोमा-
न्निग्रहमोक्षोऽचिराद्ग्रहाणां स्यात् ॥ २६ ॥

गव्याक्तैर्जुहुयात्पृथग्दशशतं मन्त्री मयूरेध्मकै-
भूयस्तैश्चतुरङ्गुलैश्च शिवपञ्चम्यां निशायां हुनेत् ।
सर्पिर्मार्गरसपञ्चगव्यचरुसर्पिः ससंपातकं
हुत्वा तत्प्रतिभोजयेत्प्रतिशमं यान्त्येव सर्वे ग्रहाः ॥

षट्कोणे कर्णिकायां स्फुरयुगलवृतां साध्यगर्भां च शक्तिं
कोणाग्रे प्रस्फुरद्वन्द्वकमथ विलिखेन्मन्त्रवर्णान्दलेषु ।
षड्वेदद्वन्द्वषड्वेदकचतुर्युगषट्संख्यकान्बाह्यषट्के
वर्मास्त्रार्णां तदेतद्ग्रहगदभयहृद्यन्त्रमाघोरमाहुः ॥ २८ ॥

न च रिपवो न च रोगा
न ग्रहपीडा न शस्त्रबाधा च ।
न क्ष्वेलरुजा मर्त्या-
न्स्पृशन्त्यघोरास्त्रमन्त्रजापपरान् ॥ २९ ॥

तस्मादघोरास्त्रमनुं प्रजप्या-
त्समर्चयेत्तद्विहितं यथावत् ।
हुनेच्च तेनैव समस्तवाञ्छा-
संसिद्धये चाथ विमुक्तये च ॥ ३० ॥

खसप्तमः कर्णयुतोऽर्धचन्द्रवा-
ल्लँपञ्चमो द्वीन्दुयुतो ध्रुवादिकः ।
मनुः स्वयं मृत्युजयात्मकः स्फुटं
समीरितः साधकरक्षणक्षमः ॥ ३१ ॥

ऋषिरस्य कहोलाख्य-
श्छन्दो देव्यादिका च गायत्री ।
स्याद्देवता च मृत्युं-
जयरुद्रोऽङ्गान्यथाचरेद्भृगुणा ॥ ३२ ॥

स्फुटितनलिनसंस्थं मौलिबद्धेन्दुरेखा-
गलदमृतजलार्द्रं चन्द्रवह्न्यर्कनेत्रम् ।
स्वकरकलितमुद्रापाशवेदाक्षमालं
स्फटिकरजतमुक्तागौरमीशं नमामि ॥ ३३ ॥

जप्तव्योऽयं मन्त्रवर्यस्त्रिलक्षं
दीक्षापूर्वं होमकृत्स्याद्दशांशैः ।
दुग्धाज्याक्तैः शुद्धखण्डैर्गलूच्या
गुर्वादेशात्साधको हव्यवाहे ॥ ३४ ॥

अर्चा कार्या नित्यशः शैवपीठे
स्यादप्यङ्गैर्लोकपालैस्तदस्त्रैः ।
सम्यक्पूजावस्तुभिर्मन्त्रजापैः
प्रोक्तं ह्येतन्मृत्युभेत्तुर्विधानम् ॥ ३५ ॥

इति जपहुतार्चनाद्यैः
सिद्धो मन्त्रोक्तमूर्तिविहितमनुः ।
संभावयेन्निजान्त-
र्योगं कृत्यापमृत्युनाशकरम् ॥ ३६ ॥

तारनालमथ मध्यपत्रकं
ह्राद्यकर्णिकयुतं क्रमोत्क्रमात् ।
चिन्तयेन्नियतमन्तरा शिवं
नीरुजे च नियतायुषेऽब्जयोः ॥ ३७ ॥

ऊर्ध्वाधःप्रोतपद्मद्वयदलनिचितैरक्षराद्यैर्ध्रुवाद्यै-
राद्यन्तैर्मन्दमन्दप्रतिगलितसुधापूरसंसिच्यमानम् ।
ईशानं सूक्ष्मरूपं विमलतरसुषुम्नान्तरा संनिषण्णं
ध्यायन्नाप्नोति रोगैर्नियतपरिहृतः संजपाद्दीर्घमायुः ॥

आदौ तारं विलिखतु ससाध्याह्वयं कर्णिकायां
दिक्पत्रेष्वप्ययपरमपरं चापि तत्कोणकेषु ।
भूयो भूमेः पुरमनु मृगाङ्कं तदश्रेषु टान्तं
जप्त्वा बन्धं ग्रहगदविषध्वंसि यन्त्रं तदेतत् ॥ ३८ ॥

इति कृतयन्त्रविभूषित-
मण्डलमध्ये निधाय कलशमपि ।
आपूर्य चाभिषिञ्चे-
च्छ्रीवश्यकरं ग्रहाभिचारहरम् ॥ ३९ ॥

ततश्छिन्नोद्भवानां तु समिद्भिश्चतुरङ्गुलैः ।
दुग्धसिक्तैः समिद्धेऽग्नौ षट्सहस्रद्वयं हुनेत् ॥ ४० ॥

यस्तु वह्नौ जुहोत्येवं यावत्संख्येन साधकः ।
तावत्संख्यैः सुधाकुम्भैरग्निः प्रीणाति शंकरम् ॥ ४१ ॥

आप्यायितोऽग्निना शर्वः साधकस्येप्सितान्वरान् ।
प्रदद्यादायुराद्यांश्च दुरन्तान्प्रलयान्तिकान् ॥ ४२ ॥

मन्त्रान्ते साध्याख्यां
पालययुगलं प्रतीपमपि मन्त्रम् ।

*P II. 7

प्रोक्त्वा समापयेन्मनु-
मयमपि मृत्युंजयाह्वयो मन्त्रः ॥ ४३ ॥

अथ वामलकमलपुटा-
न्तरितं शिशुवेषभूषणं रुद्रम् ।
ध्यात्वा जपेद्यथाव-
द्धुतक्लृप्त्या मृत्युनाशनं दृष्टम् ॥ ४४ ॥

चतुरङ्गुलपरिमाणै-
रमृताखण्डैरथार्कसाहस्रम् ।
जुहुयाच्च दुग्धसिक्तै-
रारोग्यायायुषे च लक्ष्म्यै च ॥ ४५ ॥

अमृतावटतिलदूर्वाः
पयो घृतं पायसं क्रमेणेति ।
सप्तद्रव्याण्युक्ता-
न्येतैर्जुहुयात्पृथक्सहस्रतयम् ॥ ४६ ॥

तीव्रे ज्वरे घोरतरेऽभिचारे
सोन्मादके दाहगदे च मोहे ।

तनोति शान्तिं नचिरेण होमः
संजीवनं चाब्दशतप्रमाणम् ॥ ४७ ॥

संभोजयेद्धोमदिने च विप्रा-
न्सप्ताधिकान्स्वादुभिरन्नजातैः ।
सतर्णका गाश्च हुतावसाने
दद्याद्विजेभ्यो हुतकर्मकृद्भ्यः ॥ ४८ ॥

निजजन्मदिने शतं शतं यो
जुहुयाद्द्रव्यवरैः ससप्तसंख्यैः ।
मधुरैरपि भोजयेच्च विप्रा-
नभिवाञ्छन्नियमेन दीर्घमायुः ॥ ४९ ॥

अथ वा सप्तभिरेतै-
र्द्रव्यैरेकेन वा सहस्रत्रयम् ।
जन्मर्क्षे होममात्रा-
न्निरुपद्रवमुत्तमं व्रजेदायुः ॥ ५० ॥

दूर्वात्रितयैर्जुहुया-
न्मन्त्रविदेकादशाहुतीर्दिनशः ।

जित्वापमृत्युरोगा-
न्प्रयात्यसावायुषश्च दैर्घ्यमपि ॥ ५१ ॥

जन्मर्क्षाणां त्रितये
च्छिन्नाकाश्मर्यवकुलकैरिध्मैः ।
क्रमशो हुनेत्सहस्रं
नश्यन्त्यपमृत्युरोगदुरितानि ॥ ५२ ॥

सितसिद्धार्थसहस्रा-
हुत्या नश्यन्त्युपद्रवा ज्वरजाः ।
तद्वदपामार्गहुता
मृत्युंजयमप्यरोगतां लभते ॥ ५३ ॥

प्रोक्तैर्ध्यानजपार्चनाहुतविधानाद्यैश्च मृत्युंजयं
यो मन्त्री प्रभजन्मनुं प्रतिदिनं प्रातः प्रसन्नाशयः
तस्येष्टानि भवन्ति संसृतिरपि स्फीता च पुत्रादयः
संपन्नः सुसुखी च जीवति चिरं देहापदि स्याच्छिवः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे षड्विंशः पटलः ॥

सप्तविंशः पटलः ॥

अथ सजपहुताद्यो वक्ष्यते साधुचिन्ता-
मणिरभिमतकामप्राप्तिकल्पद्रुमोऽयम् ।
अनलकषमरेफप्राणसद्यान्तवाम-
[1]श्रुतिहिमधरखङ्गैर्मण्डितो मन्त्रराजः ॥ १ ॥

ऋषिरपि काश्यप उक्त-
श्छन्दोऽनुष्टुप्च देवतोमेशः ।
[2]यान्तैः षड्भिर्वर्णै-
रङ्गं वा देवतार्धनारीशः ॥ २ ॥

अहिशशधरगङ्गाबद्धतुङ्गात्ममौलि-
स्त्रिदशगणनताङ्घ्रिस्त्रीक्षणः स्त्रीविलासी ।
भुजगपरशुशूलान्खड्गवह्नी कपालं
शरमपि धनुरीशो बिभ्रदव्याच्चिरं वः ॥ ३ ॥

---

1. श्रुतिशश० 2. स्वान्तैः

हावभावललितार्धनारिकं
भीषणार्धमपि[1] वा महेश्वरम् ।
पाशसोत्पलकपालशूलिनं
चिन्तयेज्जपविधौ विभूतये ॥ ४ ॥

अथ वा षोडशशूल-
व्यग्रभुजा त्रिणयनाभिनद्धाङ्गी ।
अरुणांशुकानुलेपन-
वर्णाभरणा च भगवती ध्येया ॥ ५ ॥

विहितार्चनाविधिरथानुदिनं
प्रजपेद्दशायुतमितं मतिमान् ।
अयुतं हुनेत्त्रिमधुरार्द्रतरै-
स्तिलतण्डुलैस्तदवसानविधौ ॥ ६ ॥

शैवोक्तपीठेऽङ्गपदैर्यथाव-
द्वृक्षेचदुर्गुनगशैर्मुखाद्यैः ।
समातृभिर्दिक्पतिभिर्महेशं
पञ्चोपहारैर्विधिनार्चयीत ॥ ७ ॥

---

1. भीषणार्धमथ

आरभ्यादिज्वलनं
दिक्संस्थैरष्टभिर्मनोर्वर्णैः ।
आराधयेच्च मातृभि-
रिति संप्रोक्तः प्रयोगविधिरपरः ॥ ८ ॥

कात्पूर्वं हसलिपिसंयुतं जपादौ
जप्तॄणां प्रवरमितीह केचिदाहुः ।
प्रासादाद्ययुतजपेन मङ्क्षु कुर्या-
दावेशादिकमपि नीरुजां च मन्त्री ॥ ९ ॥

शिरसोऽवतरन्निशेशबिम्ब-
स्थितमब्भिर्वृतमागलत्सुधार्द्रम् ।
अपमृत्युहरं विषज्वराप-
स्मृतिविभ्रान्तिशिरोरुजापहं च ॥ १० ॥

निजवर्णविकीर्णकोणवैश्वा-
नरगेहद्वितयावृतत्रिकोणे ।
विगतस्वरवीतमुत्तमाङ्गे
स्मृतमेतत्क्षपयेत्क्षणाद्ग्रहार्तिम् ॥ ११ ॥

वह्नेर्बिम्बे वह्निवत्प्रज्वलन्तं
न्यस्त्वा बीजं मस्तके ग्रस्तजन्तोः ।
ध्यात्वावेशं कारयेद्बन्धुजीवं
तज्जप्तं वा सम्यगाघ्राणनेन ॥ १२ ॥

शुक्लादिः शुक्लभाः पौष्टिकशमनविधौ कृष्टिवश्येषु रक्तो
रक्तादिः क्षोभसंस्तोभनविधिषु हकारादिको हेमवर्णः ।
धूम्रोऽङ्गामर्दनोच्चाटनविधिषु समीरादिकोऽदादिरुक्तः[1]
पीताभः स्तम्भनादौ मनुरतिविमलो भुक्तिभाजामदादिः ॥

कृष्णाभः प्राणगेहस्थितमथ नयने ध्यातमान्ध्यं विधत्ते
बाधिर्यं कर्णरन्ध्रेऽर्दितमपि वदने कुक्षिगं शूलमाशु ।
मर्मस्थाने समीरं सपदि शिरसि वा दुःसहं शीर्षरोगं
वाग्रोधं कण्ठनालेऽवनिवृतमथ तन्मण्डले [2]पीतमेतत् ॥

प्रालेयत्विषि च स्वरावृतमिदं नेत्रे स्मृतं तद्रुजं
योनौ वामदृशोऽस्रविस्रुतिमथो कुक्षौ च शूलं [3]जपेत् ।
विस्फोटे सविषे ज्वरे तृषि तथा रक्तामये विभ्रमे
दाहे शीर्षगदे स्मरेद्विधिमिमं संतृप्तये मन्त्रवित् ॥ १५ ॥

---

1. अलादिरुक्तः 2. बीजमेतत् 3. जयेत्

साध्याया हृदयकुशेशयोदरस्थं
    प्राणाख्यं दृढमवबध्य बीजवर्णैः ।
तेजस्तच्छिरसि विधुं विधाय वाते
    नाकर्षेदपि निजवाञ्छयैव मन्त्री ॥ १६ ॥

पारिभद्रसुमनोदलभद्रं
    वह्निबिम्बगतमक्षरमेतत् ।
संस्मरेच्छिरसि यस्य स वश्यो
    जायते न खलु तत्र विचारः ॥ १७ ॥

निजनामगर्भमथ बीजमिदं
    प्रविचिन्त्य योनिसुषिरे सुदृशः ।
वशयेत्क्षणाच्छिततया मनसः
    स्रवयेच्च शुक्रमथ वा रुधिरम् ॥ १८ ॥

निजशिवशिरःश्रितं त-
    [1]द्बिम्बं स्मृत्वा प्रवेशयेद्योनौ
यस्यास्तत्संपर्का-
    त्तां च क्षरयेत्क्षणेन वशयेच्च ॥ १९ ॥

---

1. द्वीजं

पररेफगर्भधृतसाध्यपदं
त्रिकगं हुताशयुतषट्कवृतम् ।
विगतस्वरावृतमगारभुवि
स्थितमेतदाशु वशयेद्रमणान् ॥ २० ॥

मधुरत्रयसंयुतेन शाली-
रजसा पुत्तलिकां विधाय तेन ।
मनुना जुहुयात्तया विभज्य
त्रिदिनं यस्य कृते वशो भवेत्सः ॥ २१ ॥

विषपावकोद्यदभिधानगदं
ठगतं कुकोणयुतलाङ्गलिकम्[1] ।
अहिपत्रक्लप्तपरिजप्तमिदं
शिरसो रुजं प्रशमयेददनात् ॥ २२ ॥

कण्ठे केनावनद्धार्पितदहनयुजा मज्जया मेन वामं
दक्षं संवेष्ट्य वक्षोरुहमनलसमीरैर्भिरंसद्वयं च ।
वक्त्रे नाभौ च दीर्घं सुमतिरथ विनिक्षिप्य बिन्दुं निशेशं
वक्षस्याधाय बद्ध्वा चिरमिव विहरेत्कन्दुकैरात्मसाध्यैः ॥

1. ०लिनम्

कृत्वा वह्नेः पुरमनु मनुं बन्धुजीवेन तस्मि-
न्नाधायाग्निं विधिवदभिसंपूज्य चाज्यैः शताख्यम् ।
त्रैलोहाख्ये प्रतिविहितसंपातमष्टोत्तरं त-
द्धुत्वा जप्तं दुरितविषवेतालभूतादिहारि ॥ २४ ॥

साध्याख्यागर्भमेनं लिख दहनपुरे कर्णिकायां षडश्रं
बाह्येऽश्रिष्वङ्गमन्त्रान्दलमनु परितो बीजवर्णान्विभज्य ।
भूयोऽचः कादियादींस्त्रिषु वृतिषु कुगेहाश्रके नारसिंहं
तस्मिन्कार्यो यथावत्कलशविधिरयं सर्वरक्षाकरः स्यात् ॥

टान्ते लिख्यात्कलाभिर्वृतमनुमनलावासयुग्मेन वह्नि-
द्योतत्कोणेन बाह्ये तदनु सवितृबिम्बेन काद्यार्णभाजा ।
तद्बाह्ये क्ष्मापुराभ्यां लिखितनृहरियुक्ताश्रकाभ्यां तदेत-
द्यन्त्रं रक्षाकरं स्याद्ग्रहगदविषमक्ष्वेलजूर्त्यादिरोगे ॥२६॥

बिम्बद्वन्द्वे कृशानोर्विलिखतु मणिमेनं ससाध्यं तदश्रि-
ष्वग्न्यादीन्व्यञ्जनार्णान्स्वरयुगलमथो संधिषट्के यथावत् ।
तारावीतं च बाह्ये कुगृहपरिवृतं गोमयाद्रोचनाभ्यां
लाक्षाबद्धं निबध्याज्जपमहितमिदं साधु साध्योत्तमाङ्गे ॥

लक्ष्म्यायुःपुष्टिकरं
परं च सौभाग्यवश्यकृत्सततम् ।
चोरव्यालमहोरग-
भूतापस्मारहारि यन्त्रमिदम् ॥ २८ ॥

साध्याख्याकर्मयुक्तं दहनपुरयुगे मन्त्रमेनं तदश्रि-
ष्वग्निज्वालाश्च बाह्ये विषतरुविटपे साग्रशाखे लिखित्वा ।
जप्त्वाष्टोर्ध्वं सहस्रं नृहरिकृतधिया स्थापयेत्तत्र शत्रु-
व्याघ्रादिक्रोडचोरादिभिरपि च पिशाचादयो न व्रजन्ति ॥

ससिद्धसुरपूजितः सकलवर्गसंसाधको
ग्रहज्वररुजापहो विषविसर्पदोषापहः ।
किमत्र बहुनार्थिनामभिमतार्थचिन्तामणिः
समुक्त इह संग्रहान्मनुवरस्तु चिन्तामणिः ॥

षष्ठस्वरो हुतवहस्तययोस्तुरीया-
वाद्यस्वरो मनुरयं कथितः फडन्तः ।
अस्य त्रिको निगदितो मनुरप्यनुष्टु-
प्छन्दश्च चण्डसहितो मनुदेवतेशः ॥ ३१ ॥

सप्तज्वलज्वालिनिभिस्तटेन च हतेन च ।
सर्वज्वालिनिसंयुक्तैः फडन्तैरङ्गमाचरेत् ॥ ३२ ॥

अव्यात्कपर्दकलितेन्दुकरः करात्त-
शूलाक्षसूत्रककमण्डलुटङ्क ईशः ।
रक्ताभवर्णवसनोऽरुणपङ्कजस्थो
नेत्रत्रयोल्लासितवक्त्रसरोरुहो वः ॥ ३३ ॥

कृतसंदीक्षो मन्त्री
जप्याल्लक्षलयं च मन्त्रमिमम् ।
जुहुयात्रिमधुरसिक्तैः
सतिलैरपि तण्डुलैर्दशांशेन ॥ ३४ ॥

व्याघातसमिद्भिर्वा
मनुजापी तावतीभिरथ जुहुयात् ।
[1]पूर्वोक्तार्चापीठे
गन्धाद्यैरर्चयेच्च चण्डेशम् ॥ ३५ ॥

चण्डचण्डाय चेत्युक्त्वा प्रवदेद्विद्महेपदम् ।
चण्डेश्वराय च प्रोक्त्वा [2]धीमहीपदमुच्चरेत् ॥ ३६ ॥

---

1. पूर्वोक्त एव पीठे. 2. धीमहे०

तन्नश्चण्ड इति प्रोक्त्वा भूयो ब्रूयात्प्रचोदयात् ।
एषा तु चण्डगायत्री जपात्सांनिध्यकारिणी ॥ ३७ ॥

अङ्गैः समातृभिर्मन्त्री लोकेशैः संप्रपूजयेत् ।
कूर्मो विष्णुयुतो दण्डी बीजमस्योच्यते बुधैः ॥ ३८ ॥

वदेच्चण्डेश्वरायेति बीजादिहृदयान्तिकम् ।
अर्चनादिष्विमं मन्त्रं यथावत्संप्रयोजयेत् ॥ ३९ ॥

एवं जपहुतार्चाभिः सिद्धमात्रे तु मन्त्रके ।
वाञ्छितादधिकं लभ्येत्काञ्चनं नात्र संशयः ॥ ४० ॥

त्र्यक्षरस्य जपो यावत्तावज्जप्यात्षडक्षरम् ।
ऐहिकामुष्मिकीं सिद्धिं यथा हि लभते नरः ॥ ४१ ॥

कृत्वा पिष्टेन शल्याः प्रतिकृतिमनलं चापि काष्ठैश्चिताना-
माधायारभ्य पुंसस्त्रिमधुरलुलिता दक्षिणाङ्गुष्ठदेशात्
छित्त्वा च्छित्त्वाष्टयुक्तं शतमथ जुहुयाद्योषितां वामपादा-
द्विप्रादीनां चतुर्णां वशकरमनिशं मन्त्रमेतद्धुतान्तम् ॥

अनुदिनमष्टशतं यो
जुहुयात्पुष्पैरनेन मन्त्रेण ।

सप्तदिनैः स तु लभते
वासस्तद्वर्णसंकाशम् ॥ ४३ ॥

अहरहरष्टशतं यो
मन्त्रेणानेन तर्पयेदीशम् ।
तस्य तु मासचतुष्का-
दर्वाक्संजायते महालक्ष्मीः ॥ ४४ ॥

साध्यर्क्षाङ्घ्रिपचर्मणां सुमसृणां पिष्टैश्च लोणैः समं
कृत्वा पुत्तलिकां प्रतिष्ठितचलां जप्त्वा च रात्रौ हुनेत् ।
सप्ताहं पुरुषोऽङ्गना यदि चिरं वश्यं त्ववश्यं भवे-
दस्मिञ्जन्मनि नात्र चोद्यविषयो देहान्तरे संशयः ॥

इति चण्डमन्त्रविहितं विधिव-
द्विधिमादरेण य इमं भजते ।
स तु वाञ्छितं [1]पदमिहाप्य पुनः
शिवरूपतामपि परत्र लभेत् ॥ ४६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्द-
भगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे सप्तविंशः पटलः ॥

---

1. पदमवाप्य.

अष्टाविंशः पटलः ॥

अथाखिलार्थानुततैव[1] शक्ति-
युक्ता चतुर्विंशतितत्त्वभेदैः ।
गायत्रिसंज्ञापि च तद्विशेषा-
नथ प्रयोगान्कथयामि साङ्गान् ॥ १ ॥

ताराह्वयो व्याहृतयश्च सप्त
गायत्रिमन्त्रः शिरसा समेतः ।
अन्वर्थकं मन्त्रमिमं तु वेद-
सारं पुनर्वेदविदो वदन्ति ॥ २ ॥

जप्यः स्यादिह परलोकसिद्धिकामै-
र्मन्त्रोऽयं [2]महिततरैर्द्विजैर्यथावत् ।
भूदेवा नरपतयस्तृतीयवर्णाः
संप्रोक्ता द्विजवचनेन तत्र भूयः ॥ ३ ॥

---

1. ०नुगतैव. 2. महिततरो.

तेषां शुद्धकुलद्वयोत्थमहसामारभ्य तन्तुक्रियां
तारव्याहृतिसंयुता सहशिरा गायत्र्युपास्या परा ।
संध्योपासनया जपेन च तथा स्वाध्यायभेदैरपि
प्राणायामविधानत: सुमतिभिर्ध्यानेन नित्यं द्विजै: ।।

आदौ तार: प्रकृतिविकृतिप्रोत्थितोऽसौ च मूला-
धारादारादलिविरुतिराविश्य सौषुम्नमार्गम् ।
आद्यै: शान्तावधिभिरनुगो मात्रया सप्तभेदै:
शुद्धो मूर्धावधि परिगत: शाश्वतोऽन्तर्बहिश्च ।। ५ ।।

प्रकाशितादौ प्रणवप्रपञ्चता
निगद्यते व्याहृतिसप्तकं पुन: ।
सभूर्भुव: स्वश्च महर्जनस्तप:-
समन्वितं सत्यमिति क्रमेण च ।। ६ ।।

भू:पदाद्या व्याहृतयो भूशब्दस्तदि वर्तते ।
तत्पदं सदिति प्रोक्तं सन्मात्रत्वात्तु भूरत: ।। ७ ।।

भूतत्वात्कारणत्वाच्च भुव:शब्दस्य संगति: ।
[1]सर्वस्वीकरणात्स्वात्मतया च स्वरितीरितम् ।। ८ ।।

1. सर्वस्य स्वीरणात्

*P. II. 8

महस्त्वाच्च महत्त्वाच्च महःशब्दः समीरितः ।
तदेव सर्वजनता तस्मात्तु व्याहृतिर्जनः ॥ ९ ॥

तपो ज्ञानतया चैव तथा तापतया स्मृतम् ।
सत्यं परत्वादात्मत्वादनन्तज्ञानतः स्मृतम् ॥ १० ॥

प्रणवस्य व्याहृतीनामतः संबन्ध उच्यते ।
अकारो भूरुकारस्तु भुवो मार्णः स्वरीरितः ॥ ११ ॥

बिन्दुर्महस्तथा नादो जनः शक्तिस्तपः स्मृतम् ।
शान्तं सत्यमिति प्रोक्तं यत्तत्परतरं पदम् ॥ १२ ॥

प्रणवस्य व्याहृतीनां गायत्र्यैक्यमथोच्यते ।
अत्रापि तत्पदं पूर्वं प्रोक्तं तदनुवर्ण्यते ॥ १३ ॥

तद्द्वितीयैकवचनमनेनाखिलवस्तुनः ।
सृष्ट्यादिकारणं तेजोरूपमादित्यमण्डले ॥ १४ ॥

अभिध्येयं [1]परानन्दं परं ब्रह्माभिधीयते ।
यत्तत्सवितुरित्युक्तं षष्ठ्येकवचनात्मकम् ॥ १५ ॥

धातोरिह समुत्पन्नं प्राणिप्रसववाचकात् ।
सर्वासां प्राणिजातीनामिति प्रसवितुः सदा ॥ १६ ॥

---

1. सदानन्दं

वरेण्यं वरणीयत्वात्सेवनीयतया तथा ।
भजनीयतया सर्वैः प्रार्थनीयतया स्मृतम् ॥ १७ ॥

पूर्वस्याष्टाक्षरस्यैवं व्याहृतिर्भूरिति स्मृता ।
पापस्य भञ्जनाद्भर्गो भक्तस्निग्धतया तथा ॥ १८ ॥

देवस्य वृष्टिदानादिगुणयुक्तस्य नित्यशः ।
प्रभूतेन प्रकाशेन दीप्यमानस्य वै तथा ॥ १९ ॥

ध्यैचिन्तायामतो धातोर्निष्पन्नं धीमहीत्यदः ।
निगमाद्येन दिव्येन विद्यारूपेण चक्षुषा ॥ २० ॥

दृश्यो हिरण्मयो देव आदित्ये नित्यसंस्थितः ।
हीनतारहितं तेजो यस्य स्यात्स हिरण्मयः ॥ २१ ॥

यः सूक्ष्मः सोऽहमित्येवं चिन्तयामः सदैव तु ।
द्वितीयाष्टाक्षरस्यैवं व्याहृतिर्भुव ईरिता ॥ २२ ॥

धियो बुद्धीर्मनोरस्य च्छान्दसत्वाद्य ईरितः ।
कृतश्च लिङ्गव्यत्यासः सूत्रात्सुप्तिङुपग्रहात् ॥ २३ ॥

यत्तु तेजो निरुपमं सर्वदेवमयात्मकम् ।
भजतां पापनाशस्य हेतुभूतमिहोच्यते ॥ २४ ॥

न इति प्रोक्त आदेशः षष्ठ्यासौ युष्मदस्मदोः ।
तस्मादस्माकमित्यर्थः प्रार्थनायां प्रचोदयात् ॥ २५ ॥

तृतीयाष्टाक्षरस्यापि व्याहृतिः स्वरितीरिता ।
एवं दश पदान्यस्यास्त्रयश्चाष्टाक्षराः स्मृताः ॥ २६ ॥

षडक्षराश्च चत्वारः स्युश्चतुर्विंशदक्षराः ।
इत्थंभूतं यदेतस्य देवस्य सवितुर्विभोः ॥ २७ ॥

वरेण्यं भजतां पापविनाशनकरं परम् ।
भर्गोऽस्माभिरभिध्यातं धियस्तन्नः प्रचोदयात् ॥ २८ ॥

उक्तैवमत्र गायत्री पुनस्तच्छिर उच्यते ।
आपो ज्योती रस इति सोमाग्न्योस्तेज उच्यते ॥२९॥

तदात्मकं जगत्सर्वं रसस्तेजोद्वयं युतम् ।
अमृतं तदनाशित्वाद्ब्रह्मत्वाद्ब्रह्म उच्यते ॥ ३० ॥

यदानन्दात्मकं ब्रह्म सत्यज्ञानादिलक्षणम् ।
तद्भूर्भुवःस्वरित्युक्तं सोऽहमित्योमुदाहृतम् ॥ ३१ ॥

एतत्तु वेदसारस्य शिरस्त्वाच्छिर उच्यते ।
लक्षणैरिति निर्दिष्टो वेदसारेषु निष्ठितः ॥ ३२ ॥

फलार्थी तदवाप्नोति मुमुक्षुर्मोक्षमृच्छति ।
उपव्युषस्येवोत्थाय कृतशौचविधिर्द्विजः ॥ ३३ ॥

दन्तानां धावनं चैव जिह्वानिर्लेखनादिकम् ।
कृत्वा स्नात्वा समाचम्य मन्त्रपूतेन वारिणा ॥ ३४ ॥

आपो हि ष्ठा मयेत्यादिऋग्भिस्तिसृभिरेव च ।
अभ्युक्ष्य शुद्धदेहः सन्नपः पीत्वा समाहितः ॥ ३५ ॥

सूर्यश्चेत्यनुवाकेन पुनराचम्य पूर्ववत् ।
अभ्युक्ष्य शुद्धदेहः सन्गृहीत्वाञ्जलिना जलम् ॥ ३६ ॥

आदित्याभिमुखो भूत्वा तद्गतात्मोर्ध्वलोचनः ।
वेदसारं परं ज्योतिर्मूलभूतं परात्परम् ॥ ३७ ॥

हृत्स्थं सर्वस्य लोकस्य मण्डलान्तर्व्यवस्थितम् ।
चिन्तयन्परमात्मानमप ऊर्ध्वं विनिक्षिपेत् ॥ ३८ ॥

एनस्ताः प्रतिनिघ्नन्ति जगदाप्याययन्ति च ।
ततः प्रदक्षिणीकृत्य पुनराचम्य संयतः ॥ ३९ ॥

क्रमात्तारादिमन्त्राणामृष्यादीन्विन्यसेत्सुधीः ।
तत्र तु प्रणवस्यादावृषिरुक्तः प्रजापतिः ॥ ४० ॥

छन्दश्च देवी गायत्री परमात्मा च देवता ।
जमदग्निभरद्वाजभृगुगौतमकाश्यपाः ॥ ४१ ॥

विश्वामित्रवसिष्ठाख्यावृषयो व्याहृतीरिताः ।
गायत्र्युष्णिगनुष्टुप्च बृहती पङ्क्तिरेव च ॥ ४२ ॥

त्रिष्टुब्जगत्यौ च्छन्दांसि कथ्यन्ते देवता अपि ।
सप्तार्चिरनिलः सूर्यो वाक्पतिर्वरुणो वृषा ॥ ४३ ॥

विश्वेदेवा इति प्रोक्ताः सप्त व्याहृतिदेवताः ।
हृन्मुखांसोरुयुग्मेषु सोदरेषु क्रमान्न्यसेत् ॥ ४४ ॥

विश्वामित्रस्तु गायत्र्या ऋषिश्छन्दः स्वयं स्मृतम् ।
सविता देवता चास्य ब्रह्मा शिर ऋषिः स्मृतः ॥ ४५ ॥

छन्दश्च देवी गायत्री परमात्मा च देवता ।
स्थानेषु पूर्वमुक्तेषु सताराव्याहृतीर्न्यसेत् ॥ ४६ ॥

गायत्रीं शिरसा विद्वाञ्जपेत्रिः स्यादुपासना ।
हृदयेऽधस्तथोर्ध्वं च महादिक्ष्वपि संयतः ॥ ४७ ॥

व्यापयेद्व्याहृतीः सम्यग्गायत्रीं च शिरोयुताम् ।
सार्थसंस्मृति संजप्यात्रिरिदं जपलक्षणम् ॥ ४८ ॥

आत्मन्यधश्चोपरितो दिग्भ्यस्ताः समुपानयेत् ।
गायत्रीं पूर्ववज्जप्यात्स्वाध्यायविधिरीदृशः ॥ ४९ ॥

एतत्त्रयं त्रिशः कुर्यादृजुकायस्त्वनन्यधीः ।
निरुच्छ्वासः स विज्ञेयः प्राणायामो मनीषिभिः ॥५०॥

ध्यानस्य केवलस्यास्य व्याख्याने दर्शितः क्रमः ।
त्रिव्याहृत्यादिमभ्यस्येद्गायत्रीं संध्ययोः सुधीः ॥ ५१ ॥

शतं वाथ सहस्रं वा मन्त्रार्थगतमानसः ।
पूर्वं प्रपञ्चयागोक्तान्गाणपत्यजपादिकान् ॥ ५२ ॥

लिपिन्यासादिकान्साङ्गान्महन्न्यासादिसंयुतान् ।
सनिजर्ष्यादिकान्सर्वान्विदध्याद्विधिवद्बुधः ॥ ५३ ॥

पादसंधिचतुष्कान्धुनाभिहृद्गलदोर्द्वयी ।
संध्यास्यनासागण्डाक्षिकर्णभ्रूमस्तकेष्वपि ॥ ५४ ॥

वारुणैन्द्वयाम्यप्रागूर्ध्वकेषु मुखेषु च ।
क्रमेण वर्णान्विन्यस्येद्गायत्र्या मन्त्रवित्तमः ॥ ५५ ॥

शिरोभ्रूमध्यनयनवक्त्रकण्ठेषु वै क्रमात् ।
हृन्नाभिगुह्यजान्वाख्यपादेष्वपि पदान्न्यसेत् ॥ ५६ ॥

सब्रह्मविष्णुरुद्रैश्च सेश्वरैः ससदाशिवैः ।
ससर्वात्माह्वयैः कुर्यादङ्गन्यासं समाहितः ॥ ५७ ॥

एवं कृत्वा तु सिद्ध्यर्थं गायत्रीं दीक्षितो जपेत् ।
अथ त्रिगुणिते प्रोक्ते विचित्रे मण्डलोत्तमे ॥ ५८ ॥

शक्तिभिः प्राक्समुक्ताभिः सौरं पीठं समर्चयेत् ।
तत्र निक्षिप्य कलशं यथापूर्वोपचारतः ॥ ५९ ॥

गव्यैर्वा पञ्चभिः क्वाथजलैर्वा पूरयेत्ततः ।
तस्मिन्नावाह्य कलशे शक्तिमित्थं विचिन्तयेत् ॥ ६० ॥

मन्दाराह्वयरोचनाञ्जनजपाख्याभैर्मुखैरिन्दुम-
द्रत्नोद्यन्मकुटांशुभिस्ततचतुर्विंशार्णचित्रा[1] तनुः ।
अम्भोजारिदराह्वयौ गुणकपालाख्ये च पाशाङ्कुशे-
ष्टाभीतीर्दधती भवेद्भवदभीष्टोत्तारिणी तारिणी ॥ ६१ ॥

संचिन्त्य भर्तारमिति प्रभाणां
त्रिशक्तिमूर्तीः प्रथमं समर्च्य ।
आदित्यशक्त्याख्यचतुष्टयेन
यजेद्द्वितीयावरणे दिनेशम् ॥ ६२ ॥

---

1. ०मकुटांशुसंततचतुर्विंशार्णतत्त्वा

प्रह्लादिनीं प्रभां नित्यां सविश्वंभरसंज्ञकाम् ।
विलासिनीप्रभावत्यौ जयां शान्तां क्रमाद्यजेत् ॥ ६३ ॥

तमोपहारिणीं सूक्ष्मां विश्वयोनिं जयावहाम् ।
पद्मालयां परां शोभां भद्ररूपां तथा यजेत् ॥ ६४ ॥

मातृभिश्चारुणाभिश्च षष्ठ्यथो सप्तमीग्रहैः ।
आदित्यपार्षदन्तैरप्यष्टमीन्द्रादिभिः सुरैः ॥ ६५ ॥

आवृतिः कथिता चेति विधानं परमीदृशम् ।
गन्धादिभिर्निवेद्यान्तैर्दिनेशं सम्यगर्चयेत् ॥ ६६ ॥

अथ पुनरमुमभिषिञ्चे-
त्संयतचित्तं च देशिकः शिष्यम् ।
कृतहुतविधिमपि विधिव-
द्विहितबलिं दत्तदक्षिणं गुरवे ॥ ६७ ॥

भूयस्त्वक्षरलक्षं
गायत्रीं संयतात्मको जप्त्वा ।
जुहुयात्पायसतिलघृत-
दूर्वाभिर्दुग्धतरुसमिद्भिरपि ॥ ६८ ॥

एकैकं त्रिसहस्रं
मन्त्री समभीष्टसिद्धये मुक्त्यै ।
अक्षरसहस्रसंख्यं
मुख्यतरैः केवलैस्तिलैर्जुहुयात् ॥ ६९ ॥

दुरितोच्छेदनविधये
मन्त्री दीर्घायुषे च विशदमतिः ।
आयुष्कामो जुहुया-
त्पायसहविराज्यकेवलाज्यैश्च ॥ ७० ॥

दूर्वाभिः सतिलाभिः
सर्वैस्त्रिसहस्रसंख्यकं मन्त्री ।
अथ तु त्रिमधुरसिक्तै-
ररुणैर्जुहुयात्सरोरुहैरयुतम् ॥ ७१ ॥

नष्टश्रीरपि भूयो
भवति मनोज्ञश्च मन्दिरं लक्ष्म्याः ।
अन्नाद्यर्थ्यन्नैरपि
पालाशैर्ब्रह्मवर्चसे जुहुयात् ।

सर्वैरेतैर्जुहुया-
त्सर्वफलाप्त्यै द्विजेश्वरो मतिमान् ॥ ७२ ॥

इति परमरहस्यं वेदसारस्य सारं
गदितमजसुशुद्धैर्योगिभिर्ध्यानगम्यम् ।
अमुमथ जपहोमध्यानकाले य एवं
भजति स तु विशुद्धः कर्मभिर्मुक्तिमेति ॥ ७३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे अष्टाविंशः पटलः ॥

एकोनत्रिंशः पटलः ॥

अथ वक्ष्यामि विद्यायास्त्रिष्टुभः प्रवरं विधिम् ।
ऋषिच्छन्दोदेवताभिरङ्गन्यासक्रमैः सह ॥ १ ॥

मारीचः काश्यपो ज्ञेय ऋषिश्छन्दः स्वयं स्मृतम् ।
देवता जातवेदोऽग्निरुच्यन्तेऽङ्गान्यतः परम् ॥ २ ॥

नवभिः सप्तभिः षड्भिः सप्तभिश्च तथाष्टभिः ।
सप्तभिर्मूलमन्त्रेण कुर्यादङ्गानि षट् क्रमात् ॥ ३ ॥

अङ्गुष्ठगुल्फजङ्घासु जानूरुकटिगुह्यके ।
स्तनाभिहृदयोरोजपार्श्वयुक्पृष्ठकेषु च ॥ ४ ॥

स्कन्धयोरुभयोर्मध्ये बाहुमूलोपबाहुषु ।
प्रकूर्परप्रकोष्ठेषु मणिबन्धतलेषु च ॥ ५ ॥

मुखनासाक्षिकर्णेषु मस्तमस्तिष्कमूर्धसु ।
न्यसेन्मन्त्राक्षरान्मन्त्री क्रमाद्वा व्युत्क्रमात्तनौ ॥ ६ ॥

शिखाललाटदृक्कर्णयुगोष्ठरसनासु च ।
सकर्णबाहुहृत्कुक्षिकटिगुह्योरुजानुषु ।
जङ्घाचरणयोर्न्यस्येत्पदानि त्रिष्टुभः क्रमात् ॥ ७ ॥

[1]भास्वद्विद्युत्करालाकुलहरिगलसंस्थारिशङ्खासिखेटे-
ष्वस्त्रासाख्यत्रिशूलानरिगणभयदां तर्जनीं चादधाना ।
चर्माण्युद्धूर्णदोर्भिः प्रहरणनिपुणाभिर्वृता कन्यकाभि-
र्दद्यात्कार्शानवीष्टांस्त्रिणयनलसिता कापि कात्यायनी वः॥

इति विन्यस्तदेहस्तु कुर्याज्जप्यादिकाः क्रियाः ।
दीक्षा प्रवर्त्यते पूर्वं यथावद्देशिकोत्तमैः ॥ ९ ॥

ततोऽस्त्रक्लृप्तिः संप्रोक्ता स्यात्प्रयोगविधिस्ततः ।
दीक्षकाख्याक्षराण्यादौ शक्त्यावेष्ट्य ततो बहिः ॥१०॥

यन्त्रं षड्गुणितं कृत्वा दुर्वर्णलसिताश्रकम् ।
बहिरष्टदलं पद्मं प्रोक्तलक्षणलक्षितम् ॥ ११ ॥

अत्र पीठं यजेन्मन्त्री क्रमात्सनवशक्तिकम् ।
जया च विजया भद्रा भद्रकाली सुदुर्मुखी ॥ १२ ॥

---

1. उद्यद्विद्यु०

व्याघ्रसिंहमुखीदुर्गात्रिष्टुभो नव शक्तयः ।
तत्रादाय घटं दिव्यक्काथमूत्रपयोम्भसाम् ॥ १३ ॥

एकेन पूरयित्वास्मिन्नावाह्य च विभावसुम् ।
अङ्गावृतेर्बहिर्ग्न्यादिपादाष्टकविनिःसृताः ॥ १४ ॥

मूर्तीरभ्यर्चयेदग्नेर्जातवेदादिकाः क्रमात् ।
पृथिव्यम्ब्वनलेरानप्यात्मनेपदसंयुतान् ॥ १५ ॥

अर्चयेद्दिक्षु कोणेषु निवृत्त्यादीर्यथाक्रमम् ।
दिक्ष्वेकादशसंख्याः स्युर्जागताद्यर्णशक्तयः ॥ १६ ॥

लोकपालांश्च तद्धेतीर्विधिनेति समर्चयेत् ।
जागता तापिनी वेदगर्भा दाहनरूपिणी ॥ १७ ॥

सेन्दुखण्डा सुम्भहन्त्री सनभश्चारिणी तथा ।
वागीश्वरी मदवहा सोमरूपा मनोजवा ॥ १८ ॥

मरुद्वेगा रात्रिसंज्ञा तीव्रकोपा यशोवती ।
तोयात्मिका तथा नित्या दयावत्यपि हारिणी ॥ १९ ॥

तिरस्क्रिया वेदमाता तथान्या दमनप्रिया ।
समाराध्या नन्दिनी च परा रिपुविमर्दिनी ॥ २० ॥

षष्ठी च दण्डिनी तिग्मा दुर्गा गायत्रिसंज्ञका ।
निरवद्या विशालाक्षी श्वासोद्वाहा च नादिनी ॥ २१ ॥

वेदना वह्निगर्भा च सिंहवाहाह्वया तथा ।
धुर्या दुर्विषहा चैव रिरंसा तापहारिणी ॥ २२ ॥

त्यक्तदोषा निःसपत्ना चत्वारिंशच्चतुर्युताः ।
अभिषिच्य पुनः शिष्यं कुम्भादीन्गुरुराहरेत् ॥ २३ ॥

ईदृशं यन्त्रमारुह्य जपेच्छिष्यः सुयन्त्रितः ।
मन्त्राक्षरसहस्रं तु सिद्ध्यर्थं गुरुसंनिधौ ॥ २४ ॥

सर्वजापेषु संज्ञेया गायत्र्या द्विगुणो जपः ।
कर्तव्यो वाञ्छितार्थाप्त्यै रक्षायै कार्यसिद्धये ॥ २५ ॥

तिलराज्यनलक्षीरवृक्षेध्महविराज्यकैः ।
सर्पिःसिक्तैः क्रमाद्धोमः साधयेदीप्सितं नृणाम् ॥ २६ ॥

चत्वारि चत्वारिंशच्च चतुःशतसमन्वितम् ।
चतुःसहस्रसंयुक्तं प्रोक्तैरेतैर्हुतक्रिया ॥ २७ ॥

एवं संसिद्धमन्त्रस्य स्युरस्त्राद्याः क्रिया मताः ।
चत्वारि चत्वारिंशच्च वर्णानामस्त्रमिष्यते ॥ २८ ॥

विलोमपाठो वर्णानामक्रमाहुर्मनीषिणः ।
पादाष्टकमिदं विद्यात्ततोऽष्टाङ्गो मनुः स्वयम् ॥ २९ ॥

जप्तुकामो मनुं त्वेनं पादांस्तु प्रतिलोमतः ।
पठेत्तथा हि मन्त्रोऽयं क्षाल्यते दुष्टदूषितः ॥ ३० ॥

आद्याः पञ्चाक्षरपदास्त्रयः सप्ताक्षरः परः ।
पञ्चमश्चाथ षष्ठश्च द्वौ तु पादौ षडक्षरौ ।
पञ्चाक्षरौ तदन्त्यौ च तेषां भावो निगद्यते ॥ ३१ ॥

ग्न्याद्यं ज्ञानेन्द्रियं कामं द्वितीयं पाञ्चभौतिकम् ।
तृतीयं धातवः सप्त चतुर्थं वर्णसप्तकम् ॥ ३२ ॥

षडूर्मयः पञ्चमं स्यात्षष्ठः षट्कौशिको मतः ।
सप्तमश्चाष्टमः पादः शब्दाद्यं वचनादिकम् ॥ ३३ ॥

साङ्गः सत्प्रतिपत्तिकः सगुरुपद्वन्द्वप्रमाणक्रमा-
ज्ज्ञाप्येत्यादिषडन्तकोऽन्तविगतो वर्णप्रतीपस्तथा ।
गुर्वादेशविधानतश्च विविधध्यानक्रियो मन्त्रिणा
तत्तत्कार्यसमाप्तयेऽखिलविपद्ध्वान्तौघभानूदयः ॥

अनुलोमजपेऽङ्गानामपि पाठोऽनुलोमतः ।
प्रतिलोमानि तानि स्युः प्रतिलोमविधौ तथा ॥ ३५ ॥

अन्तः पादप्रतीपे हि तथा तानि भवन्ति हि ।
वर्णप्रतीपे च तथा मात्राण्यप्रतिलोमके ॥ ३६ ॥

प्रतिपत्तिविशेषांश्च तत्र तत्र विचक्षणः ।
गुर्वादेशविधानेन प्रविद्ध्यान्न चान्यथा ॥ ३७ ॥

जपः पुरोक्तसंख्यः स्याद्धुतक्लृप्तिस्तथा भवेत् ।
क्षीरद्रुमसमिद्राजितिलहव्यघृतैः क्रमात् ॥ ३८ ॥

अथ वा पञ्चगव्योत्थचरुणा हुतमुच्यते ।
प्रत्यङ्मुखेन कर्तव्यं प्रायो जपहुतादिकम् ॥ ३९ ॥

तत्र स्युर्मन्त्रवर्णेभ्यस्तावत्यो वह्निदेवताः ।
प्रत्येकमावृतास्तास्तु पञ्चकेन नतभ्रुवाम् ॥ ४० ॥

तत्पञ्चकं च प्रत्येकमावृतं पञ्चभिः पृथक् ।
प्रत्येकं पञ्चकानां तु षोडशावृतिरिष्यते ॥ ४१ ॥

प्रत्येकं षोडशानां तु कोटयः [1]परिचारिकाः ।
इत्येकाक्षरजात्पूर्वमेकस्मात्षोडशात्मकात् ॥ ४२ ॥

एतावत्यस्तु जातास्ताद्विस्तरं पुनरूहयेत् ।
तत्र त्विन्द्रियजाः प्रोक्ता देवतास्तूर्ध्वदृष्टयः ॥ ४३ ॥

तिर्यञ्चो भौतिकाः प्रोक्ता धातूत्थास्तूभया नराः ।
उर्मिजास्तूर्ध्ववदनास्तिर्यञ्चश्चाथ कोशजाः ॥ ४४ ॥

क्लीबा मुखद्वयोपेता गोचरोत्थाः स्त्रियो मताः ।
अधोमुखाश्च तिर्यञ्च इत्युक्तो मूर्तिसंग्रहः ॥ ४५ ॥

आभिः सर्वाभिरपि च शिखाभिर्जातवेदसः ।
व्याप्यते परराष्ट्रेषु वृक्षगुल्मतृणादिकम् ॥ ४६ ॥

आरम्भे मानुषाणि स्युर्नक्षत्राण्याभिचारके ।
कर्माण्यासुरभानि स्युर्दैवानि स्युस्तथा हुतौ ॥ ४७ ॥

अन्त्याश्वीन्द्वर्कादिति
गुरुहरिमित्रानिलाह्वया देवाः ।

---

1. परिवारिकाः

पूर्वोत्तरत्रयी यम-
हरविधयो मानुषाः परेऽसुरभाः ॥ ४८ ॥

नन्दास्वारभ्य रिक्तासु प्रयोज्यात्मनि संहरेत् ।
भद्रासु संग्रहं कुर्याज्जयासु च विशेषतः ।
आरेणारभ्य मन्देन प्रयोज्यादित्यवारके ॥ ४९ ॥

संहरेत्संग्रहं कुर्याद्वारे त्वाचार्ययोः सुधीः ।
चरोर्विसृज्योभयकैराहरेदभ्यसेत्स्थिरैः ॥ ५० ॥

दिनास्त्रं दिनकृद्युक्तं वारग्रहसमन्वितम् ।
कृत्तिकादि च कृत्यान्तं कृत्यास्त्रं जातवेदसः ॥ ५१ ॥

नक्षत्रात्मा हुताशः स्यात्तिथ्यात्मेन्दुरुदाहृतः ।
ताभ्यां करोति दिनकृद्विसर्गादानकर्मणी ॥ ५२ ॥

रक्षानिग्रहकर्मणोस्तु पराग्वक्त्राः प्रधानाकृति-
प्रख्या मन्त्रविधानविच्च दिशि दिश्येकादशैकादश ।
संस्थाप्य क्रमशोऽक्षरोदितरुचीः शक्तीर्जपेद्वा मनुं
सम्यग्वा जुहुयादनुप्रतिगतं सिद्ध्यै समाराधयेत् ॥

पीतायोमुष्टिगदा-
हस्ता महिषाज्यसंयुतपुलाकैः ।
वैभीतारिष्टसमि-
त्कोद्रवकैः स्तम्भयेच्च हुतविधिना ॥ ५४ ॥

सुसिता पाशाङ्कुशयु-
ग्विगलद्वारिप्रवाहसंभिन्ना ।
वेतससमिदाहुत्या
मधुरयुजा मङ्क्षु वर्षयेद्दुर्गा ॥ ५५ ॥

रक्ता पाशाङ्कुशिनी
निशि फलिनीकेसरोद्भवैः कुसुमैः ।
चन्दनरससंसिक्तै-
र्होमाद्दुर्गा वशीकरोति जगत् ॥ ५६ ॥

लवणैस्त्रिमधुरसिक्तै-
स्तत्कृतया वा जुहोतु पुत्तल्या ।
उडुतरुकाष्ठैर्नक्तं
सप्ताहान्नृपतिमपि वशीकुरुते ॥ ५७ ॥

सकपालशूलपाशा-
    ङ्कुशहस्तारुणतरा तथा दुर्गा ।
आकर्षयते लावण-
    पुत्तल्या त्रिमधुराक्तया होमात् ॥ ५८ ॥

ध्यात्वा धूम्रां मुसल-
    त्रिशिखकरामस्थिभिश्च तीक्ष्णाक्तैः ।
कार्पासानां निम्ब-
    च्छदमेषघृतैर्हुताच्च विद्वेषः ॥ ५९ ॥

धूम्रा तर्जनिशूला-
    हितहस्ता विषदलैः समहिषाज्यैः ।
होमाच्च मरिचसर्षप-
    चरुभिरजारुधिरसेचितैरटयेत् ॥ ६० ॥

शिखिशूलकराग्निनिभा
    सर्षपतैलाक्तमत्तबीजैश्च ।
मरिचैर्वा राजियुतै-
    र्होमादहितान्विमोहयेद्दुर्गा ॥ ६१ ॥

कृष्णा शूलासिकरा
रिपुदिनवृक्षोद्भवैः समित्प्रवरैः ।
व्रणकृद्घृतसंसिक्तै-
र्होमान्मासेन मारयेद्दुर्गा ॥ ६२ ॥

नक्षत्रवृक्षसमिधो
मरिचानि च तीक्ष्णहिङ्गुशकलानि ।
मारणकर्मणि विहिता-
न्यरुष्करस्नेहसिक्तानि ॥ ६३ ॥

नक्षत्रवृक्षसमिधां
विलिखितसाध्याभिधानकर्मवताम् ।
सचतुश्चत्वारिंश-
त्तत्त्वयुजां होमकर्म मरणकरम् ॥ ६४ ॥

मरिचं क्षौद्रसमेतं
प्रत्यक्पुष्पीपरागसंभिन्नम् ।
उष्णाम्भःपरिलुलितं
प्रसेचयेद्दक्षवृक्षपुत्तल्याः ॥ ६५ ॥

हृदये वदने च रिपोः
संमुखतः संप्रतिष्ठितोरायाः ।
जूर्त्यभिभूतोऽरिः स्या-
त्तत्कथनात्पक्षमात्रकान्म्रियते ॥ ६६ ॥

सैव प्रतिकृतिरसकृ-
त्प्रतिष्ठितसमीरणा च विशदधिया ।
तीक्ष्णस्नेहालिप्ता
विलोमजापेन तापनीयाग्नौ ॥ ६७ ॥

विधिना ज्वरपीडा स्या-
दपघनहोमेन हानिरङ्गस्य ।
सर्वाहुत्या मरणं
प्राप्नोति रिपुर्न तत्र संदेहः ॥ ६८ ॥

प्राक्प्रोक्तान्भूतवर्णान्दश दश युगशो बिन्दुयुक्तान्नमोन्ता-
न्योनेर्मध्याश्रमध्येष्वपि पुनरथ संस्थाप्य भूताभवर्णान् ।
वर्णैस्तैः साकमग्नेर्मनुमपि कुलिशाद्यैः स्वचिह्नैः समेतं
कुर्यात्कर्माणि सम्यक्पटुविशदमतिः स्तम्भनाद्यानि मन्त्री ॥

[1]ऊदोद्रादिलळा: को-
नसौ चतुर्थार्णका वसौ वाराम् ।
दृष्टचैद्वितीयरक्षा
वह्नेरद्वन्द्वयोनिकादियषा: ॥ ७० ॥

मरुत: कपोलबिन्दुक-
पञ्चमवर्णा: शहौ तथा व्योम्न: ।
मनुषु परेष्वपि मन्त्री
कर्माणि करोतु तत्र संसिद्धै ॥ ७१ ॥

उन्मत्तक्ष्वेलनेत्रद्रुमभवसमिधां सप्तसाहस्रिकान्तं
प्रत्येकं राजितैलालुलितमथ हुनेन्माहिषाज्यप्लुतं वा ।
कृष्णाष्टम्याद्यमेवं सुनियतचरित: सप्तरात्रं निशायां
नि:संदेहोऽस्य शत्रुस्त्यजति किल निजं देहमाविष्टमोह: ॥

सामुद्रे च सहिङ्गुजीरकविषे साध्यर्क्षवृक्षाकृतिं
कृत्वा यो वदनाञ्जले घटकटाहादिश्रिते क्काथयेत् ।
सप्ताहं ज्वलनं जपन्विषतरोर्यष्टया शिरस्ताडनं
कुर्वन्सप्तदिनान्तरैर्यमपुरक्रीडापर: स्यादरि: ॥ ७३ ॥

---

1. ऊओद्रा

अर्कस्यन्दनबद्धपन्नगमुखग्रस्ताङ्घ्रिमाशाम्बरं
न्यग्वक्त्रं तिलजाप्लुतं विषहरं दीप्तं करैर्भास्वतः ।
वायुप्रेरितवह्निमण्डलमहाज्वालाकुलास्यादिकं
ध्यायन्वैरिणमुत्क्षिपेज्जलममुं मन्त्रं जपेन्मृत्यवे ॥ ७४ ॥

आर्द्रांशुकोऽग्निमनुना त्वथ सप्तरात्रं
सिद्धार्थतैललुलितैर्मरिचैर्जुहोतु ।
आरभ्य विष्टिदिवसेऽरिनरः प्रलाप-
मूर्छान्वितेन विषयीक्रियते ज्वरेण ॥ ७५ ॥

तालस्य पत्रे भुजपत्रके वा
मध्ये लिखेत्साध्यनराभिधानम् ।
अथाभितो मन्त्रमिमं विलोमं
विलिख्य भूमौ [1]विनिखन्य तत्र ॥ ७६ ॥

आधाय वैश्वानरमादरेण
समर्च्य सम्यङ्मरिचैर्जुहोतु ।
तीव्रो ज्वरस्तस्य भवेत्पुनस्त-
त्तोये क्षिपेद्वश्यतमः स भूयात् ॥ ७७ ॥

1. विनिहत्य

सिंहस्थाशरनिकरैः कृशानुवक्त्रै-
धावन्तं रिपुमनुधावमानमेनाम् ।
संचिन्त्य क्षिपतु जलं दिनेशबिम्बे
जप्त्वामुं मनुमपि चाटनाय शीघ्रम् ।। ७८ ।।

कृत्वा स्थण्डिलमङ्गणे भगवतीं न्यासक्रमैरर्चये-
द्गन्धाद्यैः पुनरन्धसा च विकिरन्मन्त्री निशायां बलिम् ।
जप्त्वा मन्त्रममुं च रोगसहिताः कृत्यानिकृत्या कृतां-
स्तांस्तान्भूतपिशाचवैरिविहितान्दुःखानसौ नाशयेत् ।।

विधिवदभिज्वाल्यानल-
मन्वहमाराध्य गन्धपुष्पाद्यैः ।
संध्याजपाच्च मनुरय-
माकाङ्क्षितसकलसिद्धिकल्पतरुः ।। ८० ।।

कुसुमरसलुलितलोणै-
र्वारुणवदनो जुहोतु संध्यासु ।
मन्त्रार्णसंख्यमग्ने-
रैक्येन द्रावयेदरीनचिरात् ।। ८१ ।।

शुद्धैश्च तण्डुलैरपि
 हविर्विनिष्पाद्य पञ्चगव्यमपि ।
सघृतेन तेन जुहुया-
 दष्टसहस्रं [1]समेतसंपातम् ॥ ८२ ॥

प्राशितसंपातस्य
 स्याद्रक्षा सर्वथैव साध्यस्य ।
प्राङ्गणमन्दिरयोरपि
 निखनेद्द्वारे च शिष्टसंपातम् ॥ ८३ ॥

कृत्या नश्यति तस्मि-
 न्वीक्षन्ते न ग्रहादयो भीत्या ।
कर्तारमेव कुपिता
 कृत्या सर्वात्मना च नाशयति ॥ ८४ ॥

ब्रह्मद्रुमफलकान्ते
 मन्त्रितमः सप्तसप्तकोष्ठयुते ।
कोणोदराणि हित्वा
 मायाबीजं सकर्ममध्यगते ॥ ८५ ॥

---

1. समे ससंपातम्

विलिखेत्क्रमेण मन्त्रा-
क्षरांश्च शिष्टेषु तेषु कोष्ठेषु ।
तत्र मरुतः प्रतिष्ठां
विधाय विनिधाय वह्निमपि जुहुयात् ॥ ८६ ॥

आज्येनाष्टसहस्रं
फलकोपरि सम्यगात्तसंपातम् ।
विप्रतिपत्तिधरायां
निखनेन्नश्यन्त्युपद्रवाः सद्यः ॥ ८७ ॥

सिकताचरुगव्याश्मक-
मृदां प्रतिष्ठा विधीयते सिद्ध्यै ।
प्रस्थाढकघटमाना
ग्रहपुरविषयाभिगुप्तये सिकताः ॥ ८८ ॥

मध्याष्टाशान्तासु च
कुण्डानामारचय्य नवकमपि ।
विधिना निवपेत्क्रमशः
सिंहधनुश्छागयायिनि दिनेशे ॥ ८९ ॥

तिथिषु तु कालाष्टम्यां
  [1]तेषु विशाखाग्निमूलभागेषु ।
वारेषु मन्दवाक्पति-
  वर्जं सर्वे तथा प्रशस्यन्ते ॥ ९० ॥

हस्तश्रवणमखासु
  प्राजापत्येषु कर्म कुर्वीत ।
द्वादशसहस्रसंख्यं
  प्रजपेद्गायत्रमपि यथाप्रोक्तम् ॥ ९१ ॥

मध्ये च मूलमनुना
  तदायुधैरष्टदिक्षु चक्राद्यैः ।
सकपालान्तैः पृथगपि
  संस्थापनकर्म निगदितं विधिवत् ॥ ९२ ॥

तास्ताश्च देवता अपि
  परिपूज्य यथाक्रमेण मन्त्रितमः ।
कुर्याद्बलिं [2]दिनग्रह-
  करणेभ्यो लोकपालराशिभ्यः ॥ ९३ ॥

---

1. भेषु; 2. दिनकरग्रहणेभ्यो

सिकताः षोडशकुडुवं
ब्रह्मद्रुमभाजने तु गव्याक्तम् ।
निवपति यदि विधिना तं
देशं ग्रामं करोति चतुरब्दात् ॥ ९४ ॥

अर्केऽजस्थेऽब्धिगायामपरिमितजलायां समादाय शुद्धाः
संम्यक्संशोषयित्वातपमनु सिकताः शूर्पकोणैर्विशोध्य ।
संसिद्धे पञ्चगव्ये सुमतिरथ विनिक्षिप्य ताः कुम्भसंस्था
मन्त्राग्नौ मन्त्रजापी द्विजतरुसमिधा भर्जयेत्कार्यहेतोः ॥

एवं मृदुपलचरवः
संस्थाप्यन्ते सपञ्चगव्यास्ते ।
वसुधाविप्रतिपत्ति-
क्षयं च पुष्टिं च कुर्वते क्रमशः ॥ ९६ ॥

व्रीहिभिरन्नैः क्षीरैः
समिद्भिरथ दुग्धवीरुधामाज्यैः ।
मधुरत्रयमधुरतरै-
र्महतीमृद्धिं [1]करोति हुतविधिना ॥ ९७ ॥

1. करोतु

यद्यद्वाञ्छति पुरुष-
स्तत्तदमुष्य प्रभावतः साध्यम् ।
सग्रहनक्षत्राद्यां
सगिरिपुरग्रामकाननां वसुधाम् ॥ ९८ ॥

साहिझषोपलमुदधिं
दहति ह मतिमानयत्नमेतेन ।
एवं प्रोत्थापयति च
मन्त्रेणानेन निशितधीर्मन्त्री ॥
पुंसा केन कियद्वा
मन्त्रस्याचक्षतेऽस्य सामर्थ्यम् ॥ ९९ ॥

तस्मादेनं मनुवरमभीष्टाप्तये संयतात्मा
जप्यान्नित्यं सहुतविधिरप्यादरादर्चयीत ।
भक्त्या कुर्यात्सुमतिरभिषेकादिकं कर्मजातं
कर्तुं वान्यत्प्रवणमतिरत्रैव भक्तः सदा स्यात् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे एकोनत्रिंशः पटलः ॥

त्रिंशः पटलः ॥

——❀——

अथाभिवक्ष्ये महितस्य मन्त्र-
स्यानुष्टुभः संग्रहतो विधानम् ।
ऋष्यादिकैरङ्गपदैर्यथाव-
द्दीक्षाजपार्चाहवनैः क्रमेण ॥ १ ॥

ऋषिरभिहितो वसिष्ठ-
श्छन्दोऽनुष्टुप्च देवता रुद्रः ।
त्र्यम्बकपदादिका स्या-
न्मनुनैव षडङ्गक्लृप्तिरथ कथिता ॥ २ ॥

त्रिभिस्तु वर्णैर्हृदयं शिरश्च
चतुर्भिरष्टाभिरथो शिखा च ।
उक्तं नवार्णैः कवचं तथाक्षि-
पञ्चार्णकं त्र्यक्षरमस्त्रमाहुः ॥ ३ ॥

प्राक्प्रत्यग्याम्यसौम्ये शिरसि च वदनोरोगलांसेषु नाभौ
हृद्देशे पृष्ठकुक्ष्योरथ शिवगुदयोरूरुमूलान्तयोश्च ।
जान्वोस्तद्वृत्तयुग्मस्तनतटयुगपार्श्वेषु पत्पाणिनासा-
शीर्षेष्वप्यूर्ध्वतोऽर्णैर्न्यसतु पुनरधस्तोऽपि मन्त्री तथोर्ध्वम् ॥

चरणाग्रसंधिषु गुदा-
धारोदरहृदयकंधरेषु पुन: ।
बाह्वो: संध्यग्रास्य-
घ्राणद्वयदृक्श्रुतिभ्रुशीर्षेषु ॥ ५ ॥

वर्णान्न्यस्य शिरोभ्रू-
दृग्वक्त्रकगलहृदुदरगुह्येषु ।
ऊर्वोर्जान्वो: पदयो:
पदैश्च मनुवित्क्रमेण विन्यस्येत् ॥ ६ ॥

वसिष्ठादिक्रमेणैव अङ्गन्यासं समाचरेत् ।
वसिष्ठस्त्र्यम्बकश्चैव त्रिणेत्रश्च तथैव च ।
अनुष्टुप्छन्दसे चेति जातियुक्तेन मन्त्रवित् ॥ ७ ॥

अच्छस्वच्छारविन्दस्थितिरुभयकराङ्कस्थितं पूर्णकुम्भं
द्वाभ्यां वेदाक्षमाले निजकरकमलाभ्यां घटौ नित्यपूर्णौ ।

द्वाभ्यां तौ च स्रवन्तौ शिरसि शशिकलाबन्धुरे प्लावयन्तौ
[1]देहं देवो दधानः प्रदिशतु विशदाकल्पजालः श्रियं वः ॥

प्रासादोक्ते पीठे
गव्यैर्वा दुग्धतरुकषायैर्वा ।
संपूर्य कलशमस्मि-
न्महेशमावाह्य पूजयेद्भक्त्या ॥ ९ ॥

अङ्गैराद्यार्काद्यैः
पुनरावृतिरष्टभिर्द्वितीया स्यात् ।
मन्त्रार्णशक्तिभिः स्युः
पुनश्चतस्रो दिशापवज्राद्यैः ॥ १० ॥

अर्केन्दुधरणितोया-
नलेरवियदात्मसंज्ञकास्ते च ।
आनुष्टुभमित्यष्टा-
वरणं प्रोक्तं विधानवरमेवम् ॥ ११ ॥

रमा राका प्रभा ज्योत्स्ना पूर्णोषा पूरणी सुधा ।
विश्वा विद्या [2]सुधा प्रह्वा सारा संध्या शिवा निशा ॥

1. वेदं 2. सिता

आर्द्रा प्रज्ञा [1]प्रभा मेधा कान्तिः [2]शान्तिर्द्युतिर्मतिः ।
परोमा पावनी पद्मा शान्ता [3]मेधा जयामला ॥ १३ ॥

द्वात्रिंशदिति निर्दिष्टाः शक्तयोऽनुष्टुभः क्रमात् ।
शिवानुभावतो नित्यं जगदाप्याययन्ति याः ॥ १४ ॥

इति परिपूज्य महेशं
कलशजलैः समभिषेचयेच्छिष्यम् ।
कनकांशुकरत्नाद्यै-
र्गुरुमपि परिपूज्य मनुमतः सिद्धम् ॥ १५ ॥

प्रजपेल्लक्षायत्या
द्रव्यैर्जुहुयाज्जपावसाने च ।
बिल्वपलाशौ खदिरो
वटतिलसिद्धार्थदौग्धदुग्धानि ॥ १६ ॥

दधिदूर्वेति दशैता-
न्याज्यसमेतानि होमवस्तूनि ।
एकैकशः सहस्रं
दशभिर्हुत्वा प्रतर्प्य विप्रांश्च ॥ १७ ॥

1. वरा 2. शान्तिर्धृति० 3. मेघा

भवति नरः सिद्धमनु-
मन्त्रेण च सर्वकर्मकर्ता स्यात् ।
बिल्वैरयुतं हुत्वा
महतीं लक्ष्मीमवाप्नुयाद्विप्रः ॥ १८ ॥

तावद्भिर्द्विजवृक्षै-
र्द्विजः श्रियं पुष्कलामवाप्नोति ।
खदिरसमिदयुतहोमा-
त्तेजोबलपुष्टिमाप्नुयादिष्टाम् ॥ १९ ॥

न्यग्रोधायुतहोमा-
द्धनधान्यसमृद्धिमेति नचिरेण ।
अयुतं तिलैः प्रजुह्व-
न्नपमृत्योः पाप्मनो विमुक्तः स्यात् ॥ २० ॥

सिद्धार्थायुतहोमो
वैरिणमपमृत्युमपि विनाशयति ।
पायसहुतेन परमां
रमामथायुर्यशो लभेन्मर्त्यः ॥ २१ ॥

दुग्धहुतात्कान्तिः[1] स्या-
त्परकृत्या नश्यति श्रियं लभते ।
दधिहोमतोऽन्नवान्स्या-
त्संवननकरं च तं वदन्ति बुधाः ॥ २२ ॥

दूर्वायुतेन [2]जुहुया-
द्रोगान्निवार्य सर्वमपमृत्युम् ।
गर्वितधीरब्दानां
विप्रवरः सर्वथा शतं जीवेत् ॥ २३ ॥

निजजन्मदिने पयोन्धसा वा
[3]शतवीर्यत्रितयैः पयोघृताक्तैः ।
जुहुयाच्च शतं सविंशतिं यः
स लभेदायुररोगतां चिराय ॥ २४ ॥

काष्मर्यदारुसमिधां त्रिशतं सहस्रं
सर्पिःपयोन्नसहितं त्रितयं जुहोतु ।
विप्रान्प्रतर्प्य च गुरून्परिपूज्य सम्य-
ग्दीर्घं विमुक्तगदमायुरवाप्तुकामः ॥ २५ ॥

1. ०च्छान्तिः 2. जुहु- 3. शतवीर्या०

स्नात्वार्काभिमुखोऽम्भसि स्थित इमं मन्त्रं सहस्रं जपे-
दायुष्यं प्रतिपर्व दुग्धहविषा होमो महाश्रीप्रदः ।
लाजाभिर्निजवाञ्छिताय हवनात्कन्याशु संदीयते
स्वाद्वक्तस्तनजद्रुमैश्च हवनात्सर्वान्वशे स्थापयेत् ॥

गायत्रिवर्णपरिपूर्णतनुस्तु भानु-
स्त्रिष्टुब्विशिष्टमहिमा महितः कृशानुः ।
आनुष्टुभाक्षरसमग्ररुचिः शशाङ्को
दद्युः समुद्यतममी परिवाञ्छितं वः ॥ २७ ॥

एभिस्त्रिभिर्मनुवरैस्तु शताक्षराख्यो
मन्त्रोऽभिकाङ्क्षितफलाप्तिदकामधेनुः ।
प्रोक्तो हिताय जगतां मुनिभिः कृपार्द्र-
चित्तैर्यथोक्तमथ संग्रहतो वदामि ॥ २८ ॥

ऋष्याद्याः पूर्वोक्ता-
स्त्रिदशा स्युर्हृत्त्रयोदशभिरर्णैः ।
शिर एकादशभिश्च
द्वाविंशद्भिस्तथा शिखाकवचम ॥ २९ ॥

नयनं पञ्चदशार्णैः
सप्तभिर्दशभिरत्रमङ्गविधिः ।
विन्यासं च मनूनां
मन्त्रज्ञः पूर्ववत्क्रमात्कुर्यात् ॥ १० ॥

स्मर्तव्याखिललोकवर्ति सततं यज्जङ्गमस्थावरं
व्याप्तं येन च यत्प्रपञ्चविहितं मुक्तिश्च यत्सिद्धितः ।
यद्वा स्यात्प्रणवत्रिभेदगहनं श्रुत्या च यद्गीयते
तद्वः काङ्क्षितसिद्धयेऽस्तु परमं [1]तेजस्त्रयोत्थं महः ॥

लक्षायतो जपविधिः
शताक्षरस्याथ होमविधिरुक्तः ।
अयुतावधिको द्रव्यं
दौग्धान्नं सर्पिषा समायुक्तम् ॥ १२ ॥

सौरे पीठे पूज्या
पूर्वोक्ताङ्गैः समावृतिः प्रथमा ।
प्रह्लादिन्याद्याभि-
स्तिस्रः प्रोक्ताः क्रमात्समावृतयः ॥ १३ ॥

1. ज्योतिस्त्र०

पञ्चम्यावृतिरुक्ता
त्रैष्टुभवज्जागतादिभिस्तदनु ।
स्याच्चरमादिभिरावृति-
चतुष्कमुक्तं दशम्यथेन्द्राद्यैः ॥ ३४ ॥

इति शताक्षरमन्त्रसमर्चना
निगदितेह दशावरणा बुधैः ।
प्रजपतामभिकाङ्क्षितसिद्धये
निखिलसंसृतिमोक्षपदाप्तये ॥ ३५ ॥

दुग्धाक्तैर्जुहुयात्सहस्रममृताकाण्डैस्तु दीर्घायुषे
दूर्वाणां त्रितयैस्तथा घृतपयःसिक्तैर्घृतेनैव वा ।
लक्ष्म्यै कोकनदैश्च शोणरुचिभिस्त्रिस्वादुयुक्तैस्तथा
रक्तैरुत्पलकैस्तदह्नि विकचैर्बैल्वप्रसूनैरपि ॥ ३६ ॥

अनुदिनमघशान्त्यै संयतात्मा सहस्रं
प्रतिजुहुतु तिलैर्वा मन्त्रविन्मासमेकम् ।
अपि दिनकरसंख्यं भोजयीत द्विजाती-
न्विविधरसविशिष्टैर्भक्तितो भोज्यजातैः ॥ ३७ ॥

शतं शतं प्रातरतन्द्रितोद्यतो
जपेद्द्विजो मन्त्रमिमं शताक्षरम् ।
अरोगजुष्टं बहुलेन्दिरायुतं
शतं स जीवेच्छरदां सुखेन सः ॥ ३८ ॥

सर्वान्कामानवाप्नोति मन्त्रमेनं जपेत्तु यः ।
सर्वं साधयते मन्त्री अस्त्रशस्त्रादिलक्षणम् ॥ ३९ ॥

प्रणवव्याहृत्याद्या व्याहृतितारान्तिका च मन्त्री च ।
जप्त्वा शताक्षरीं स्यादिहपरलोकप्रसिद्धये दिनशः ॥४०॥

मनुममुमघशान्त्यै पत्पदाद्यं प्रजप्या-
द्रुदगणरहितायाप्यायुषेऽनुष्टुबाद्यम् ।
विमलमतिररातिध्वंसने त्रिष्टुबाद्यं
दिनमनु दिनवक्त्रे वत्सरं संयतात्मा ॥ ४१ ॥

शताक्षरमनोरयं क्रम उदीरितः संग्रहा-
द्भजेदमुमतन्द्रितो दिनश एव मन्त्री रहः ।
अभीष्टफलसिद्धये सुयशसे च दीर्घायुषे-
ऽप्यशेषजनरञ्जनाय चिरमिन्दिरावाप्तये ॥ ४२ ॥

संवादसूक्तविहितं
विधानमथ साङ्गदेवतारूपम् ।
वक्ष्यामि साधकाना-
मनुदिनमभिवाञ्छितप्रदानकरम् ॥ ४३ ॥

ऋषिरपि संवननोऽस्या-
नुष्टुप्च त्रिष्टुबुच्यते च्छन्दः ।
संवादाद्यः प्रोक्तः
संज्ञानाद्यश्च देवता वह्निः ॥ ४४ ॥

ब्रह्माख्यो हृदयमनुः शिरश्च विष्णू
रुद्रः स्यादिह तु शिखेश्वरश्च वर्म ।
नेत्रे द्वे भवति सदाशिवस्तथास्त्रं
सर्वात्मेत्यथ कथितं षडङ्गमेवम् ॥ ४५ ॥

धवलनलिनराजच्चन्द्रमध्ये निषण्णं
करविलसितपाशं साङ्कुशं साभयं च ।
सवरदममलेन्दुक्षीरगौरं त्रिणेत्रं
प्रणमत सुरवक्त्रं मङ्क्षु संवादयन्त्रम् ॥ ४६ ॥

सहस्रकाणां दशभिश्चतुर्भिर-
 प्यथो सहस्रैश्च चतुर्भिरन्वितम् ।
जपेन्मनुं सम्यगथाभिदीक्षित:
 पयोन्धसान्ते जुहुयाद्दशांशकम् ॥ ४७ ॥

यजेत्पुराङ्गैश्च तदर्चनाविधौ
 पुनर्द्वितीयावरणेऽग्निमूर्तिभि: ।
अनन्तरं च त्रिदिवेश्वरादिभि:
 क्रमेण वह्निं विधिनेति पूजयेत् ॥ ४८ ॥

संवादसूक्ते विधिनेत्यनेन
 संसाधिते कर्म करोतु मन्त्री ।
चतु:शतं चापि दशोत्तरेण
 चतुश्चतुष्कं प्रजपेद्धुनेद्वा ॥ ४९ ॥

पायसेन मधुरत्रयभाजा
 विप्रराजतरुजै: कुसुमैर्वा ।
सर्पिषा स्तनजवृक्षसमिद्भि-
 र्वाञ्छितार्थविधये प्रजुहोतु ॥ ५० ॥

जुहुयात्कलाचतुष्कैः
प्रत्यृचमायोज्य कादिवर्गचतुष्कैः ।
तद्वच्च पयशलाद्यै-
र्वर्गैः संयोज्य पूर्ववन्मतिमान् ॥ ५१ ॥

तद्वद्दचं प्रतियोज्य
त्रिष्टुप्पादांश्च पूर्वसंख्येन ।
जुहुयात्सर्पिःसिक्तं
पायसमचिरेण कार्यसमवाप्त्यै ॥ ५२ ॥

प्रतिपादमथकपर्दं
प्रतियोज्य जुहोतु पूर्ववन्मतिमान् ।
तेनाभीष्टावाप्ति-
र्नचिरेण नरस्य हस्तगा भवति ॥ ५३ ॥

अक्षरपादात्रिष्टु-
ब्युक्तैः सूक्तैस्तु पूर्वसंख्येन ।
जुहुयात्समाजरूपं
संवादयितुं प्रतर्पयेद्वाग्भिः ॥ ५४ ॥

उद्दिश्य यद्यदिह मन्त्रितमो जुहोति
सूक्तैरमा निगदितैस्त्रिविधैश्च मन्त्रैः ।
व्यस्तैर्यथाविभवतो विधिवत्समस्तै-
स्तत्तस्य सिध्यति समग्रमयत्नमेव ॥ ५५ ॥

ऋग्वारुणी ध्रुवा स्वाद्या या सा त्रिष्टुब्निगद्यते ।
ऋषिर्वसिष्ठस्त्रिष्टुप्च च्छन्दो वारीशदेवता ॥ ५६ ॥

अष्टभिः सप्तभिः षड्भिः पुनस्तावद्भिरक्षरैः ।
षडङ्गानि विधेयानि तन्मन्त्रसमुदीरितैः ॥ ५७ ॥

अङ्गुल्यग्रससंधिपायुशिवसंज्ञाधारनाभिष्वथो
कुक्षौ पृष्ठहृदोरुरोजगलदोःसंध्यग्रवक्त्रेषु च ।
गण्डघ्राणविलोचनश्रवणयुग्भ्रूमध्यमध्येषु के
सर्वाङ्गेषु तथा न्यसेद्विशदर्धीर्वर्णैः समर्थैः क्रमात् ॥

अच्छांशुकाभरणमाल्यविलेपनाढ्यः
पाशाङ्कुशाभयवरोद्यतदोः सरोजः ।
स्वच्छारविन्दवसतिः सुसितः प्रसन्नो
भूयाद्विभूतिविधये वरुणश्चिरं वः ॥ ५९ ॥

अङ्गैरष्टभिरहिपै-
 र्दिशाधिपैः समभिपूज्य वारीशम् ।
कलशैः पुनरभिषिञ्चे-
 त्परमगुरुर्मन्त्रजापिनं शिष्यम् ॥ ६० ॥

वसुभिः प्रसाद्य देशिक-
 मथ शिष्यो मनुमिमं जपेल्लक्षम् ।
जुहुयाच्च दुग्धपक्कै-
 रन्नैरयुतं घृताप्लुतैर्मतिमान् ॥ ६१ ॥

ऋगियमृणमोचनी स्या-
 ज्जपैर्हुतैस्तर्पणैश्च मन्त्रविदः ।
संप्राप्तदुर्गतेरपि
 सद्यो हृद्यां च संवहेल्लक्ष्मीम् ॥ ६२ ॥

इक्षोः सितैश्च शकलै-
 र्घृतसंसिक्तैश्चतुर्दिनं जुहुयात् ।
सकलोपद्रवशान्त्यै
 तथर्णमुक्त्यै च संपदे सुचिरम् ॥ ६३ ॥

वैतससमिदयुतहुता-
    द्वृष्टिमकालेऽपि वितनुते वरुणः ।
गव्यक्षीरसमेता-
    त्रिदिनकृताद्दिनमुखेषु मुदितमनाः ॥ ६४ ॥

शतभिषजि समुदितेऽर्के
    चतुःशतं पायसं हुनेत्सघृतम् ।
ऋणमोचनाय लक्ष्म्यै
    जनसंवननाय शुक्रवारे वा ॥ ६५ ॥

पाशाबद्धं वैरिण-
    मङ्कुशसंप्रोतमम्बुधेः पारे ।
ध्यायन्परे क्षिपन्तं
    वरुणं जुहुयाच्च वा तथा प्रजपेत् ।

पाशनिबद्धं वैरिण-
    मसिना च्छित्वाशु नाशयन्तममुम् ।
ध्यायन्वेतससमिधा
    गोमूत्रयुजा हुनेत्तदपहत्यै ॥ ६७ ॥

दौग्धान्नैर्भृगुवारे
घृतसंसिक्तैः कृतश्च हवनविधिः ।
ऋणमोक्षदश्च विविधो-
पद्रवशमकृद्रमाकरः प्रोक्तः ॥ ६८ ॥

पश्चिमसंध्यासमये
पश्चिमवदनोऽनलं समाराध्य ।
ऋचमेनामभिजप्या-
च्चतुःशतं सकलदुःखनाशाय ॥ ६९ ॥

शालीघृतसंसिक्ताः
सरिदन्तरतो जुहोतु परसेनाम् ।
संस्तम्भयितुं त्रिदिनं
सुमना मन्त्री चतुःशतावृत्त्या ॥ ७० ॥

प्रत्यङ्मुखोऽथ मन्त्री
प्रतर्पयेद्वा जलैः सुशुद्धतरैः ।
यः सोऽप्युपद्रवाणां
रुन्धेन्निवहं श्रियं समृच्छति च ॥ ७१ ॥

बहुना किमनेन मन्त्रिमुख्यो
मनुनाशु प्रतिसाधयेदभीष्टम् ।
हवनाक्रियथाथ तर्पणैर्वा
सजपैः पाशभृतो महामहिम्नः ॥ ७२ ॥

अथ लवणमनुं वदामि साङ्गं
सजपं सप्रतिपत्तिकं सहोमम् ।
विधिवद्विहितेन येन सर्वां
जगतीमात्मवशे करोति मन्त्री ॥ ७३ ॥

लवणाम्भासि चेत्याद्या द्वितीया लवणे इति ।
दहेति च तृतीया स्यात्सदग्ध्वेति चतुर्थ्यपि ॥ ७४ ॥

ऋक्पञ्चमी तु या ते स्याद्यथा प्रोक्तमथर्वणि ।
ऋग्भिराभिस्तु पञ्चाङ्गं पञ्चभिर्वा समीरितम् ॥ ७५ ॥

चिट्यक्षरैः षडङ्गं वा प्रणवाद्यैर्निगद्यते ।
पञ्चभिश्च त्रिभिरपि पञ्चभिः पञ्च चाक्षरैः ॥ ७६ ॥

सपञ्चभिर्युगार्णेण जातियुक्तैः समाहितः ।
अङ्गिराः स्यादृषिश्छन्दोऽनुष्टुबत्रैव देवता ।
अग्निरात्री तथा दुर्गा भद्रकाली समीरिता ॥ ७७ ॥

*P. II. 11

अरुणोऽरुणपङ्कजसंनिहितः
स्रुवशक्तिवराभययुक्तकरः ।
अमितार्चिरजात्तगतिर्विलस-
न्नयनत्रितयोऽवतु वो दहनः ॥ ७८ ॥

नीलवरांशुककेशकलापा
नीलतनुर्निबिडस्तनभारा ।
साङ्कुशपाशसशूलकपाला
यामवती भवतोऽवतु नित्यम् ॥ ७९ ॥

करकमलविराजच्चक्रशङ्खातिशूला
परिलसितकिरीटा पातितानेकदैत्या ।
त्रिणयनलसिताङ्गी तिग्मरश्मिप्रकाशा
पवनसखनिभाङ्गी पातु कात्यायनी वः ॥ ८० ॥

स्फुरौद्रसितदंष्ट्रिका त्रिणयनोर्ध्वकेशोल्वणा
कपालपरशूलसड्डमरुका त्रिशूलाकुला ।
घनाघननिभा रणद्रुचिरकिङ्किणीमालिका
भवद्विभवसिद्धये भवतु भद्रकाली चिरम् ॥ ८१ ॥

खेटासिमुसलतोमर-
कपालशक्ती: सपाशसृणि दधती ।
दंष्ट्रोग्रा सिंहस्था
...रात्रिकालिका ध्येया ॥ ८२ ॥

अयुतं नियतो मन्त्रमृकपञ्चकसमन्वितम् ।
प्रजपेत्त्रिसहस्रं वा सम्यगेनं समाहितः ॥ ८३ ॥

दशांशेन हुनेत्सिद्ध्यै हविषा घृतसंयुजा ।
एवं कृते प्रयोगार्हो मन्त्री भूयान्न चान्यथा ॥ ८४ ॥

वह्निरात्री वरे स्यातां वश्याकर्षणकर्मणोः ।
दुर्गाकाल्यौ तथा देव्यौ शस्ते मारणकर्मणि ॥ ८५ ॥

आरभ्य कर्मकृन्मन्त्री तृतीयां कृष्णपक्षजाम् ।
संदीक्षितो भवेत्पूते मन्दिरे मन्त्रजापवान् ॥ ८६ ॥

निखन्यात्तत्र कुण्डं च दोर्मात्रं त्र्यश्रमेखलम् ।
चतुष्कं सुन्दराकारं पुत्तलीनां च कारयेत् ॥ ८७ ॥

एतां साध्यर्क्षवृक्षेण शालिपिष्टेन चापराम् ।
चक्रीकरमृदा चान्यां मधूच्छिष्टेन चेतराम् ॥ ८८ ॥

तासु हृद्देशलिखितसाध्याख्यासु समाहितः ।
सम्यक्संस्थापयेत्प्राणान्साध्यादानीय साधकः ॥ ८९ ॥

उक्तानां दारवीं कुण्डे खनेन्मन्त्राभिमन्त्रिताम् ।
विष्टरां विष्टरस्याधः पादस्थाने च मृन्मयीम् ॥ ९० ॥

लम्बयेदम्बरे सिद्धमयीमूर्ध्वमधोमुखीम् ।
पुनः कृष्णाष्टमीरात्रौ पूर्वयामे गते सति ॥ ९१ ॥

रक्तमाल्याम्बरो मन्त्री कृतरक्तानुलेपनः ।
सम्यक्कृतलिपिन्यासप्राणायामादिकः शुचिः ॥ ९२ ॥

कुडुबं पोतलवणं सुश्लक्ष्णं परिचूर्णितम् ।
दधिक्षौद्रघृतक्षीरैः प्रोक्षयित्वा सुशोधितम् ॥ ९३ ॥

आलोड्य गुडमध्वाद्यैर्विस्पष्टावयवामथ ।
तेन पुत्तलिकां मन्त्री चार्वङ्गीं कारयेत्सुधीः ॥ ९४ ॥

तस्यां च स्थापयेत्प्राणान्गुर्वादेशविधानतः ।
अष्टोर्ध्वशतसंख्यं वा तथाष्टोर्ध्वसहस्रकम् ॥ ९५ ॥

ऋक्पञ्चकं पञ्चविंशत्संख्यं प्रतिकृतिं स्पृशन् ।
जपित्वाङ्गानि विन्यस्येत्स्वाङ्गप्रतिकृतावपि ॥ ९६ ॥

सतारैश्चिटिमन्त्रार्णैश्चतुर्विंशतिसंख्यकैः ।
शिरोललाटदृक्कर्णनासास्यचिबुकेष्वपि ॥ ९७ ॥

सकण्ठहृदयोरोजकुक्षिनाभिकटीषु च ।
मेढ्रपायूरुजान्वाख्यजङ्घाङ्घ्रिषु च विन्यसेत् ॥ ९८ ॥

अधो गुह्यादभेदः स्यादूर्ध्वं भेदेऽन्विते सति ।
आत्मन्येवं प्रविन्यस्य पुनः प्रतिकृतौ न्यसेत् ॥ ९९ ॥

अङ्गुष्ठसंधिप्रपदजङ्घाजानूरुपायुषु ।
सलिङ्गनाभिजठरहृदयेषु स्तनद्वये ॥ १०० ॥

कंधराचिबुकास्येषु घ्राणदृक्कर्णयुग्मके ।
ललाटशिरसोर्न्यस्येत्प्रतिमायां च संहरेत् ॥ १०१ ॥

उपलिप्याथ कुण्डं तद्बहिर्गोमयवारिणा ।
साध्यसंमुख आसीन आदध्याद्धव्यवाहनम् ॥ १०२ ॥

प्रज्वाल्य साध्योडुतरुकाष्ठैरभ्यर्च्य दीप्तिमान् ।
राजीकुशीतपुष्पाद्भिश्चषके रजतादिके ॥ १०३ ॥

देवतां प्रतिपाद्यार्घ्यं दत्त्वा कार्यार्थसिद्धये ।
उपतिष्ठेद्धुतस्यादावन्ते मन्त्रैरितीरितैः ॥ १०४ ॥

त्वमाननममित्रघ्न निशायां हव्यवाहन ।
हविषा मन्त्रदत्तेन तृप्तो भव मया सह ॥ १०५ ॥

जातवेदो महादेव तप्तजाम्बूनदप्रभ ।
स्वाहपते विश्वमक्ष लवणं दह शत्रुहन् ॥ १०६ ॥

ईशे ईश्वरि शर्वाणि ग्रस्तं मुक्तं त्वया जगत् ।
महादेवि नमस्तुभ्यं वरदे कामदा भव ॥ १०७ ॥

तमोमयि महादेवि महादेवस्य सुव्रते ।
स्त्रिया मे पुरुषं गत्वा वशमानय देहि मे ॥ १०८ ॥

दुर्गे दुर्गादिरहिते दुर्गसंशोधनार्गले ।
चक्रशङ्खधरे देवि दुष्टशत्रुभयंकरि ॥ १०९ ॥

नमस्ते दह शत्रुं मे वशमानय चण्डिके ।
शाकंभरि महादेवि शरणं मे भवानघे ॥ ११० ॥

भद्रकालि भवाभीष्टे भद्रसिद्धिप्रदायिनि ।
सपत्नान्मे दह दह पच शोषय तापय ॥ १११ ॥

शूलादिशक्तिवज्राद्यैरुत्कृत्योत्कृत्य मारय ।
महादेवि महाकालि रक्षात्मानं कुमारिके ॥ ११२ ॥

पुनः प्रतिकृतेरङ्गसप्तकं निशितायसा ।
दक्षपादादिकं छित्वा पञ्चर्चं प्रजपेन्मनुम् ॥ ११३ ॥

साध्यं संस्मृत्य शितधीर्जुहुयात्सप्तसंख्यया ।
दक्षिणं चरणं पूर्वं ततो दक्षार्धकं पुनः ॥ ११४ ॥

दक्षहस्तं तृतीयं स्याद्गलादूर्ध्वं चतुर्थकम् ।
पञ्चमं वामहस्तं स्यात्षष्ठं वामार्धमेव च ॥ ११५ ॥

सप्तमं वामपादं स्यादन्यापि स्याद्धुतक्रिया ।
सप्त सप्त विभागो वा क्रमादङ्गेषु सप्तसु ॥ ११६ ॥

एकादशांशभिन्नैर्वा तदङ्गैः सप्तभिर्हुनेत् ।
होमोऽन्यथा वा पूर्वं तु दक्षिणश्चरणो भवेत् ॥ ११७ ॥

द्वितीयो दक्षिणकरस्तृतीयः शिर उच्यते ।
वामबाहुश्चतुर्थस्तु मध्यादूर्ध्वं तु पञ्चकम् ॥ ११८ ॥

अधोभागस्तु षष्ठः स्याद्वामभागस्तु सप्तकः ।
हुत्वैवं पूर्वसंप्रोक्तैरुपस्थापकमन्त्रकैः ॥ ११९ ॥

अर्चयित्वा दण्डदीर्घं प्रणमेद्धव्यवाहनम् ।
सकर्षस्वर्णयुक्ताङ्गां शोणां दद्यात्सतर्णकाम् ॥ १२० ॥

दक्षिणां सप्तकर्षां तु दद्यान्मारणकर्मणि ।
अंशुकं रुचकं धान्यं दत्त्वा संप्रीणयेद्गुरुम् ॥ १२१ ॥

एवं कृतेन मन्त्रीष्टं लभते होमकर्मणा ।
अथ वा मारणाकाङ्क्षी साध्यवामाङ्घ्रिपांसुभिः ॥१२२॥

सनिम्बतिलसिद्धार्थव्रणकृत्तैलसंयुतैः ।
हिङ्गुत्रिकटुकोपेतैर्महिषीमूत्रपेषितैः ॥ १२३ ॥

वराहपारावतयोः पुरीषेण समन्वितैः ।
एतैश्च संमिश्रयतु लोणं पूर्वोक्तसंख्यकम् ॥ १२४ ॥

पूर्ववत्पुत्तलीं तेन लोणचूर्णेन कारयेत् ।
प्राणान्प्रतिष्ठापयेच्च तत्र पूर्वोक्तसंख्यकम् ॥ १२५ ॥

पूर्वोक्ताभिः पुत्तलीभिः कुण्डे दक्षिणदिङ्मुखे ।
दुर्गां वा भद्रकालीं वा प्रतिपद्य यथेरिताम् ॥ १२६ ॥

उपस्थिते त्वर्धरात्रे सव्यपाणिस्थशस्त्रकः ।
वामपादं समारभ्य जुहुयात्पूर्वसंख्यया ॥ १२७ ॥

समापयेद्दक्षपादं विकारेणायसो वशी ।
त्रिसप्ताहप्रयोगेण मारयेद्रिपुमात्मनः ॥ १२८ ॥

तस्यां रात्र्यामुपोष्याथ परेऽहनि च साधकः ।
प्राणायामादिभिरपि गायत्रीजपहोमकैः ॥ १२९ ॥

विमुक्तपापो भूत्वा तु स पुनर्विहरेत्सुखम् ।
यां कल्पयन्त्यपामार्गराजीघृतहवींषि च ॥ १३० ॥

पृथगष्टोत्तरशतावृत्त्या हुत्वा बलिं हरेत् ।
यो मे पुरस्तादित्यादिदशमन्त्रैर्बलिं हरेत् ॥ १३१ ॥

इति लवणमनोर्विधानमेवं
प्रणिगदितं विधिवत्प्रयोगभिन्नम् ।
विधिममुमथ साधु संप्रयुञ्ज्या-
द्व्रजति फलं निजवाञ्छितं चिराय ॥ १३२ ॥

अथ वा लवणैः परागभूतै-
र्मधुराक्तैः पुनरष्टमीनिशाद्यम् ।
जुहुयात्तु चतुर्दशीनिशान्तं
कुडुबोन्मानितमेभिरेव मन्त्रैः ॥ १३३ ॥

नारीनरान्वा नगरं नृपान्वा
ग्रामं जनान्वा मनसोऽनुकूलान् ।

वशीकरोत्येव हुतक्रियेयं
चिराय नैवात्र विचारणीयम् ॥ १३४ ॥

वस्तुनोक्तेन क्रियतां साङ्गोपाङ्गेन पुत्तली ।
तस्यां तु साध्यलिङ्गायां प्राणाद्यर्पणमाचरेत् ॥ १३५ ॥

निक्षिप्य हृदये किंचित्कीटान्तां संस्पृशन्पुनः ।
प्राणार्पणेन यत्कार्यं क्षिप्रं कुर्याद्विचक्षणः ॥ १३६ ॥

अथास्य हृदये स्मृत्वा वर्तुलं वायुमण्डलम् ।
कृष्णषड्बिन्दुगं वायुं वायुगर्भं विचिन्तयेत् ॥ १३७ ॥

तत्र भूतास्तु तन्मात्राशब्दाद्यं श्रवणादिकम् ।
धातून्मनश्च बुद्धिं च संक्षिपेदप्यहंक्रियाम् ॥ १३८ ॥

तत्सर्वं तेन चण्डेन समीरेण समीरितम् ।
अवामनासारन्ध्रेण स्वसमीपमुपानयेत् ॥ १३९ ॥

प्रवेशयेच्च पुत्तल्यां पुनस्तेनैव वर्त्मना ।
प्राणप्रतिष्ठामन्त्रेण लब्धप्राणादिकां तथा ॥ १४० ॥

याद्यष्टकान्भ्रमरवद्धृदयाम्बुजस्थां
तत्केसरार्पितपरागपरिष्कृताङ्गान् ।

संचिन्त्य साध्यहृदयेऽपि तथैव भूयः
　　साध्याम्बुजस्थानलिपिस्वकीयैः ॥ १४१ ॥

हृत्पद्ममध्यस्थिततन्तुजालै-
　　रेकैकमेकोत्पतितैः क्रमेण ।
निश्वासमात्रेण सुखं प्रविष्टा-
　　स्तत्प्राणमार्गेण हरेर्द्विरेफान् ॥ १४२ ॥

वायव्याग्नेयैन्द्रवारीणमहेश-
　　ऋव्यात्सोमप्रेतनाथाश्रितेषु ।
किञ्जल्केषु प्राणभूतद्विरेफां-
　　स्तत्संबन्धांस्तन्तुभिर्बिन्दुभूतैः ॥ १४३ ॥

अवामनासामार्गेणैवाकृष्याकृष्य पुत्तलीम् ।
प्रवेशयेत्सुधीः प्राणान्प्राणाद्यर्पणयोगतः ॥ १४४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे त्रिंशः पटलः ॥

———*———

एकत्रिंशः पटलः ॥

प्राणप्रतिष्ठानमनोर्विधानं
प्रवक्ष्यते संप्रति सर्वसिद्ध्यै ।
यस्मादृतेऽमी कथिताः प्रयोगाः
व्यर्था भवेयुर्गतजीवकल्पाः ॥ १ ॥

प्रोक्त्वा पूर्वममुष्यशब्दमथ च प्राणा इह प्राणका-
स्तद्वज्जीव इह स्थितेति च तथा सर्वेन्द्रियाणीति च ।
भूयो वाङ्मनसावुदीर्य तदनु प्राणा इहायान्त्विति
स्वाहान्तं प्रजपेन्मनुं निशितधीः प्राणान्प्रतिष्ठापयेत् ॥[1]

सृष्टिः सा जगतामनादिनिधना विश्वस्य चेष्टाकरी
प्राणाख्या प्रकृतिः क्रियामयवपुर्देवी परा देवता ।

---

[1]तद्वद्वाङ्मनसी दृशं श्रुतिमथो घ्राणं च सप्राणकं
सैवेहागतयामयुक्सुखचिरं तिष्ठन्तु ठद्वन्द्वकम् ।
मन्त्रस्यास्य विधिर्हरिश्च हर इत्येते मुनित्वे स्थिता
श्छन्दस्त्वृग्यजुषी च सामकमथर्वेतीह च्छन्दांसि च ॥

प्रत्येकं कादिवर्गैः प्रतिगतलिपिकैर्बिन्दुयुक्तैर्धराद्यैः
　शब्दाद्यैः श्रोत्रमुख्यैर्वदनकरमुखैस्तत्क्रियाभिः क्रमेण ॥
बुद्ध्याद्यैश्चात्मनेऽन्तैरुपरि च विलसज्जातिभिः षड्भिरेवं
　कुर्यादङ्गानि सम्यग्वरविशदमतिर्विश्वरूपत्वसिद्ध्यै ॥३॥

नाभेर्देशादापदं पाशबीजं
　हृद्देशादा नाभिदेशं च शक्तिम् ।
आहृद्देशं मस्तकादङ्कुशाख्यं
　न्यस्त्वा यादीन्धातुभिर्न्यस्य[1] सप्त ॥ ४ ॥

प्राणे जीवे चैव हंसश्च
　यार्णन्यस्येन्मूलं व्यापकं मस्तकादिम् ।
एवं न्यस्य प्राणशक्तिस्वरूपं
　[2]विद्यां ध्यायेदात्मरूपां च देवीम् ॥ ५ ॥

रक्ताम्बोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः
　पाशं कोदण्डमिक्षूद्भवमथ गुणमप्यङ्कुशं पञ्चबाणान् ।
बिभ्राणा सृक्कपालं त्रिणयनलसिता पीनवक्षोरुहाढ्या
　देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः स्वरूपा ॥

---

1. जन्तुषु न्यस्त　　2. बिभ्रत्

ध्यात्वा देवीं प्रजपेदेवं लक्षं मनुं समाहितधीः ।
आज्येनान्ते जुहुयाच्चरुणा वा तद्दशांशतो मन्त्री ॥ ७ ॥

शाक्ते पीठे देवीं षट्कोणस्थैः प्रजेशहरिरुद्रैः ।
वाणीलक्ष्मीगिरिजासहितैरङ्गैश्च मातृलोकेशैः ॥ ८ ॥

प्रयजेच्चतुर्भिरेवं परिवारैर्नित्यमेव निशितमनाः ।
एवं संसिद्धमनुर्वश्याद्यान्यारभेत कर्माणि ॥ ९ ॥

पाशाङ्कुशान्तरितशक्तिमनोः परस्ता-
दुच्चार्य यादिवसुवर्णगणं सहंसम् ।
पश्चादमुष्यपदमुच्चरतु प्रयोग-
मन्त्रोऽयमित्थमुदितो ग्रहसंख्यया वा ॥ १० ॥

मृता वैवस्वता चैव जीवहा प्राणहा तथा ।
आकृष्या ग्रथना चैव उन्मादा विष्फुलिङ्गिनी ।
क्षेत्रज्ञा प्रतिहारी च प्राणमूर्त्यः सयादिकाः ॥ ११ ॥

बद्ध्वा साध्या पाशबीजेन शक्त्या
गृह्णन्नाकृष्याङ्कुशेनाथ यादीन् ।

दूतीश्चोक्त्वा साध्यनाम्नाथ धातू-
नेवं मन्त्रो यावदात्मा सवीर्यः ॥ १२ ॥

सुप्ताशेषजने निशीथसमये साध्ये स्वपित्यादरा-
दारुह्य स्ववशं विधाय हृदये साध्याकृतेः कीलकम् ।
बद्ध्वा तं च निपीडमेव सहसा कालस्य यष्ट्या शिर-
स्याघातात्क्षुभिताखिलेन्द्रियगणं साध्यं स्मरेत्साधकः ॥

वायव्याग्नेयैन्द्रवारीणमहेश-
क्रव्यात्सोमप्रेतराणमध्यकेषु ।
स्थानेष्वेतेष्वष्ट यादीन्सहंसा-
न्भृङ्गान्ध्यायेद्बीजबिन्दुप्रबद्धान् ॥ १४ ॥

स्वीये चैवं संस्मरेद्धृत्सरोजे
भृङ्गीरूपान्निर्गतान्श्वासमार्गैः ।
साध्याब्जस्थांश्चञ्चरीकान्गृहीत्वा
स्वीयं स्थानं पूर्ववत्संप्रविष्टान् ॥ १५ ॥

बीजानि रक्तानि तु वश्यकर्म-
ण्यम्भोधराभान्यभिचारकाले ।

धूम्राणि विद्वेषविधौ समोहे
पीतानि संस्तम्भविधौ स्मरेच्च ॥ १६ ॥

अथ वा साध्यप्राणा-
न्मण्डूकाकारधारिणो ध्यायेत् ।
स्वीयान्भुजगाकारा-
नभिचारादौ नृशंसकर्मविधौ ॥ १७ ॥

प्राणप्रतिष्ठाकर्मैवं विधायैकादशापरम् ।
पुत्तल्यादौ स्वचित्ते वा तांस्तु संस्तम्भयेद्ध्रुवा ॥ १८ ॥

आकृष्टानां साध्यदेहादसूनां
पुत्तल्यादावप्ययं स्यात्प्रकारः ।
किं तु स्वीये हृत्सरोजे प्रवेशो
वश्याकृष्ट्योरेव नात्राभिचारे ॥ १९ ॥

पाशाद्यात्रिकयुक्तमूलहृदयभ्रूमध्यसूत्रायिता
साग्निः साध्यललाटरन्ध्रवगतोऽप्यामूलमाजग्मुषि[1] ।
योन्यां त्वात्महृदब्जमेवमनिशं भ्राम्यत्यसौ चिन्त्य तं
शक्तिर्जन्मशतान्यपीह वशयेत्साध्यं समाकर्षयेत् ॥२०॥

1. ०पतितामामूलमाजग्मुषि

प्राणप्रतिष्ठाविधिरेवमुक्तः
साङ्गः सयोगो विनियोगयुक्तः ।
अस्मिन्प्रवीणो गिरिकाननादी-
न्प्रचालयेत्प्राणवतो विधाय ॥ २१

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्द-
भगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे एकत्रिंशः पटलः ॥

द्वात्रिंशः पटलः ॥

अथ यन्त्रविरचनाभि-
मन्त्रविशेषान्बहुप्रकारयुतान् ।
कथयिष्ये मन्त्रविदा-
मैहिकपारत्रिकाप्तये सुधियाम् ॥ १ ॥

त्रिगुणितसंज्ञे माया-
लंकृतकोणे तयाभिवीते च ।
या या विशेषक्लृप्ति-
स्तां तामपि संग्रहेण समभिदधे ॥ २ ॥

कोणोल्लसितसुधाक्षर-
गलदमृतस्फुरितवह्निपरिवीतान् ।
बिन्दोर्मध्यगबीज-
स्थितान्सुधाधारया परिस्रुतया ॥ ३ ॥

पूर्णसुषुम्नारन्ध्रां
    साध्यतनुं संस्मरञ्शिरसि बध्यात् ।
तेनारोगी पुरुषः
    प्रज्ञावान्दीर्घमायुराप्नोति ॥ ४ ॥

शीतांशुमण्डलस्थं
    कूर्मचतुर्थात्तकोणलसितमिदम् ।
शीतप्रलिप्तजप्तं
    कधृतं च शिरोरुजाज्वरार्तिहरम् ॥ ५ ॥

तद्यन्त्रयुगं विलिखे-
    दभिविलिखितसाध्यसाधकाख्ययुतम् ।
साध्यमधस्तात्कृत्वा
    बद्ध्वात्र स्वपतु साधको नित्यम् ॥ ६ ॥

विधिनानेन तु सम्य-
    क्साध्योऽस्य वशे भवेदयत्नेन ।
तत्तु खनित्वागारे
    तत्रान्नं सिद्धमत्तु वश्यकरम् ॥ ७ ॥

साध्याख्यां शक्तिवह्नौ नरहरिमपि रन्ध्रत्रये च त्रिशक्तौ
कर्मालिख्याथ लोष्टे सततगमपि संस्थाप्य जप्त्वा स्वशक्त्या ।
आगारे स्थापयित्वा नरमुदकनिधेश्चित्रपत्रे लिखित्वा
दीपाग्नौ तापयित्वा स्त्रियममलधियः सम्यगाकर्षयेयुः ॥८॥

त्रिगुणितविहिता विधयः
षड्गुणिते च प्रयोजनीयाः स्युः ।
रक्षाकर्मणि विहितं
तत्प्रायः प्रचुरमन्त्रयुक्ततया ॥ ९ ॥

पाशाष्टाक्षरवीतशक्ति दहनप्रोल्लासिसाध्याह्वयं
शक्तिश्रीस्मरसंवृतं कुयुगरन्ध्राबद्धचिन्तामणि ।
इत्थं षड्गुणितं विलिख्य जपितं मन्त्री दधानोऽसकृ-
द्राज्ञां वामदृशां प्रियो भवति संग्रामे पुरे वा चिरम् ॥

चिन्तारत्नाश्रिताश्रित्रियुगमथ नृसिंहावृतान्तःस्थबीजं
प्रादुःसाध्याभिधानं बहिरपि लिपिभिः प्रानुलोमानुवीतम् ।
क्ष्माबिम्बद्वन्द्वरन्ध्रप्रचलितचतुरर्णं ग्रहोन्मादभूत-
व्याधिघ्नं यन्त्रमस्मिन्कृतकलशविधिर्गर्भरक्षाधिकारी ॥

द्वादशगुणिते शूले
  नृसिंहबीजं नरेन्द्रपुरवीतम् ।
पीतालिप्तं पुरलघु-
  धूपितमन्तःप्रबद्धकर्मयुतम् ॥ १२ ॥

चतसृषु दिक्षु निखन्या-
  त्सीमायां द्वारतोरणाधो वा ।
देशाभिगुप्तिरेषा
  गुप्ततमा सूरिभिः पुरा प्रोक्ता ॥ १३ ॥

अलदलनिशाकुशीतै-
  र्मसृणे पट्टे विलिख्य यन्त्रमिदम् ।
[1]धेरस्थापनकर्म
  प्रतिजप्तं प्राङ्गणे खनेन्मन्त्री ॥ १४ ॥

तत्र विशन्ति न चोरा
  [2]ग्रहकृत्या स्यान्निकेतरक्षा च ।
अश्माभिपातवारण-
  मभिवृद्धिं संपदां करोत्यचिरात् ॥ १५ ॥

1. सेर० 2. ग्रहकृत्याद्या निकेत०

तद्वद्भूटार्गलाख्यं
यन्त्रं नीले विलिख्य पट्टवरे ।
[1]मेचकसाध्यप्रतिकृति-
हृदये गुलिकां विधाय निक्षिप्य ॥ १६ ॥

त्रिमधुरपूर्णे पात्रे
विन्यस्याभ्यर्च्य गन्धपुष्पाद्यैः ।
बलिमपि विकिरेद्रात्रिषु
सप्ताहादानयेद्वधूमिष्टाम् ॥ १७ ॥

तामेवाथ प्रतिकृति-
मग्नौ किंचित्प्रतापयेत्प्रजपन् ।
शक्तिं पाशाङ्कुशमनु-
साध्याह्वयदर्भितां समाहितधीः ॥ १८ ॥

विधिनामुना त्रिरात्रा-
द्गर्वितधियमपि सुराङ्गनां मन्त्री ।
आकर्षेन्निजवाञ्छा-
प्रदायिनीं मदनबाणविह्वलिताम् ॥ १९ ॥

1. मोचक०

यन्त्रं तदेव लाक्षा-
ताम्रावीतं निधाय कलशजले ।
जप्त्वा भानुसहस्रक-
मभिषिञ्चेद्रजतकाञ्चनाभ्यां च ॥ २० ॥

तद्वद्विधाय [1]कलशे
तद्यन्त्रं धारयेत्पुनर्नित्यम् ।
वाञ्छितसिद्धिं लभते
भक्त्या प्रणमन्ति देवता अपि तम् ॥ २१ ॥

यन्त्रं तदेव विधिव-
द्भित्तावालिख्य पूजयेद्दिनशः ।
चोरारिभूतनागा
अपि तं देशं न वीक्षितुं शक्ताः ॥ २२ ॥

आलिख्य वीरपट्टे
यन्त्रमिदं मस्तकार्पितं कृत्वा ।
युध्यन्प्रत्यर्थिनमपि
हत्वा यात्यव्रणाङ्कितो योद्धा ॥ २३ ॥

1. कलशं

मदजलविलिखितमेत-
  द्यन्त्रं जप्तं च मस्तके न्यस्तम् ।
करिणीमपि मदयेद्वा-
  क्चण्डतरे का कथा करेणुवरे ॥ २४ ॥

बहुनेति भाषितेन कि-
  मेभ्यो मुख्यं न किमपि यन्त्रेभ्यः ।
तस्मादमूनि सद्भि-
  र्धार्याणि च विश्ववश्यमिच्छद्भिः ॥ २५ ॥

गजमृगमदकाश्मीरै-
  र्मन्त्रितमः सुरभिरोचनायुक्तैः ।
विलिखेदलक्तकरसा-
  लुलितैर्यन्त्राणि सकलकार्यार्थी ॥ २६ ॥

राज्या पटुसंयुतया
  सपाशशक्त्यङ्कुशेन मन्त्रेण ।
स्वाद्वक्तयाभिजुहु-
  न्निश्युर्वीशांस्तथोर्वशीं वशयेत् ॥ २७ ॥

हृल्लेखाग्निस्थसाध्याह्वयमपि बहिरांक्रोंवृतं वह्निगेह-
द्वन्द्वाश्रिस्वस्तिकाढ्यं प्रतिलिखतु दले यन्त्रजं नागवल्ल्याः ।
जप्त्वा शक्तिं तु पाशाङ्कुशलिपिसहितां तापयेद्दीपवह्नौ
नक्तं भक्त्यानताङ्गी स्मरशरविवशा प्रेमलोलाभियाति ॥

शक्तिस्थं निजनाभिवह्निभवनद्वन्द्वोदरे मान्मथं
　बीजं साध्यविदर्भया परिवृतं शक्त्या बहिः पार्थिवम् ।
तत्कोणे स्मरमन्थपुष्टनयनप्रोत्थैः पुनः [1]कर्णिकै-
　[2]स्ताम्बूलैर्लिखिताभिजप्तमदयेद्योषिन्मनोमोहनम् ॥२९॥

शक्त्यन्तःस्थितसाध्यनाम परितो बीजैश्चतुर्भिः समा-
　बद्धं शक्तिमनोभवाङ्कुशलिपिप्रोंभिः समावेष्टितम् ।
शाल्युत्थे प्रतिलिख्य पिष्टविकृतौ प्राणान्प्रतिष्ठाप्य च
　त्रिस्वादौ परिभर्ज्य तत्समदतः साध्यो वशे तिष्ठति ॥

डान्तं शिखीलवयुतं दहनांशसाध्यं
　मायांशसाधकमथाभिवृतं कलाभिः ।
मध्योल्लसद्विमुखशूलमिदं तु भर्तु-
　र्यन्त्राह्वयं नरनताङ्गिवशंकरं स्यात् ॥ ३१ ॥

---

1. कण्टकै- 2. स्ताम्बूले

मृत्काराङ्गुलिकात्तया सक्तुकलासान्तर्वसायुक्तया
साध्यस्याङ्घ्रिरजोयुजा मृदुमृदा क्लृप्तस्य शक्तिं हृदि ।
रूपस्याभिविलिख्य तद्विवरके साध्यं तदीरान्प्रति-
ष्ठाप्याजल्प्य निखन्य तत्र दिनशो मेहेच्चिरं वश्यकृत् ॥

वामाक्ष्याः प्रतिलिख्य नाम निशया वामोरुदेशे निशा-
मध्ये वामकरेण संशितमतिः संछादयंस्तन्मनाः ।
पूर्वं रुद्रपदं ततश्च दयितेयोगीश्वरीबिन्दुम-
न्मन्त्रं जप्यति चेदनङ्गविवशां सद्यः प्रियामानयेत् ॥

मायाहृद्दोरथान्ते
ब्रह्मश्रीराजितेऽक्षरान्प्रोक्त्वा ।
राजयुतपूजितेऽर्णा-
न्स जये विजये च गौरि गान्धारि ॥ ३४ ॥

त्रिभुवनवशंकरीति च
सर्वलोकान्तिके वशंकरि च ।
सर्वस्त्रीपुरुषवशं-
करि सुदुघे वाक्षरान्प्रवीप्स्य ततः ॥ ३५ ॥

मायाद्विठान्तिको मनु-
 रेकाधिकषष्टिवर्णकः प्रोक्तः ।
ऋषिरस्याजोऽतिनिचृ-
 च्छन्दो गौरी च देवता प्रोक्ता ॥ ३६ ॥

सचतुर्दशभिर्दशभि-
 स्तथाष्टभिश्चाष्टभिस्तथा दशभिः ।
एकादशभिर्मन्त्रा-
 क्षरैः क्रमादुच्यते षडङ्गविधिः ॥ ३७ ॥

असकलशशिराजन्मौलिराबद्धपाशा-
 ङ्कुशरुचिरकराब्जा बन्धुजीवारुणाङ्गी ।
अमरनिकरवन्द्या त्रीक्षणा शोणलेपां-
 शुककुसुमयुता स्यात्संपदे पार्वती वः ॥ ३८ ॥

अयुतं प्रजपेज्जुहुया-
 द्धृताप्लुतैः पायसैर्दशांशेन ।
आराधयेत्तदङ्गै-
 र्मातृभिराशाधिपैश्च निशितमना: ॥ ३९ ॥

तिलतण्डुलकैर्लोणै-
स्त्रिमधुरसिक्तैः फलैश्च मधुरतरैः ।
साज्यैररुणकुवलयै-
स्त्रिदिनं हवनक्रिया सुवश्यकरी ॥ ४० ॥

नित्यं चादित्यगतां
देवीं प्रतिपद्य तन्मुखो जप्यात् ।
अष्टोत्तरशतमह्ना-
मादौ भुवनं वशीकरोत्यचिरात् ॥ ४१ ॥

वर्णादर्वाङ्मन्त्री
प्रयोजयेत्साध्यनामकर्मयुतम् ।
प्रजपेद्वा हवनविधौ
वाञ्छितसिद्धिप्रदस्तथा मन्त्रः ॥ ४२ ॥

सताररराजमुख्यन्ते राजाधिमुखिवर्णकान् ।
संभाष्य वश्यमुखि च स्वां श्रीमारार्णकान्वदेत् ॥ ४३ ॥

वीप्स्य देविमहादेविपदं देवादिदेवि च ।
प्रोक्त्वा सर्वजनस्येति मुखं मम वशं वदेत् ॥ ४४ ॥

कुरु कुर्विति ठद्वन्द्वान्तिकं मन्त्रं समुद्धरेत् ।
सप्ताधिकैः सदशभिस्तथा त्रिंशद्भिरक्षरैः ॥ ४५ ॥

दशभिः सप्तभिश्चैव चतुर्भिः करणाक्षरैः ।
पञ्चभिः सप्तदशभिर्वर्णैरङ्गक्रिया मता ॥ ४६ ॥

ब्रह्माश्रीमन्त्रसंप्रोक्ता प्रतिपत्तिरमुष्य च ।
मन्त्रस्य जपक्लृप्तिस्तु तथा होमविधिर्मतः ॥ ४७ ॥

मन्त्री सर्वजनस्थाने कुर्यात्साध्याह्वयान्मनोः ।
प्रजपे हवने वाथ तथा तर्पणकर्मणि ॥ ४८ ॥

देवीध्माष्टशतं प्रसूनवदथ त्रिस्वादुयुक्तं हुने-
त्सप्ताहं भमितेन तेन विहितं पुण्ड्रादिकं वश्यकृत् ।
आज्यैस्तत्कृतहोमपातितसमाजप्तं घृतं प्राशये-
त्साध्यं निष्परिहारकं च तदिदं वश्यं भवेद्देहिनाम् ॥

शक्तिं साध्यर्क्षवृक्षप्रतिकृति हृदि संलिख्य संस्थाप्य जीवं
जप्त्वा खन्याङ्कणेऽस्मिन्विधिवदनलमाधाय पुष्पैर्जपायाः ।
देवीमन्त्रेण रात्रौ दशपरशतसंख्यैस्तु काचन्दनाक्तै-
र्हुत्वा तां सप्तरात्रं सरिति निखनतादुत्तमं वश्यकर्म ॥

अन्नं मह्यह्यन्नं
मे देह्यन्नाधिपतये ममेत्युक्त्वा ।
अन्नं प्रदापयेति च
ठद्वयुगान्तोऽन्नदायको मन्त्रः ॥ ५१ ॥

करणेन्द्रियरसधातु-
द्वयवर्णैरङ्गमन्त्रपत्रपदैः[1] ।
ह्ययुतजपावधिरेष
द्विसहस्रहुतं च सर्पिरन्नाभ्याम् ॥ ५२ ॥

दुग्धाब्धौ रूप्यवप्रावृतकनकमयद्वीपवर्ये सुराढ्ये
कल्पद्रूद्यानकाधो मणिमयलसिते वित्तसस्याग्रभागे ।
आसीने भूश्रियौ वाञ्छितवसुनिचयं मन्त्रिणे संसृजन्त्यौ
मन्त्री संचिन्तयानो जपतु दिनमुखे संपदेऽन्नस्य मन्त्रम् ॥

नत्यादिभगवत्यन्ते माहेश्वरिपदं वदेत् ।
अन्नपूर्णेऽग्निजायान्तो मन्त्रोऽन्नप्रदसंज्ञकः ॥ ५४ ॥

मायाविहितषडङ्गो
दिनमुखजप्यश्च षोडशसहस्रम् ।

1. ०मस्य मन्त्रपदैः

प्रोक्तो जपावसाने
सघृतैरन्नैर्दशांशको होमः ॥ ५५ ॥

रुद्रताण्डवविलोकनलोलां
भद्रवक्त्रनयनां भवकान्ताम् ।
अन्नदाननिरतां जननीं तां
चिन्तयञ्जपतु चित्रदुकूलाम् ॥ ५६ ॥

वैश्रवणः पकाशः
पिङ्गलनिधिपौ तथैव वित्तेशः ।
सकुबेरस्वाहान्ताः
सव्याहृतयः समीरिता मन्त्राः ॥ ५७ ॥

वित्तेशस्यान्तराले दशवटसमिधः सर्पिषाक्ता विविक्ता
होतव्या द्रव्यसिद्ध्यै कनकघटकरण्डात्तदोस्तुन्दिलोऽसौ ।
[1]हेमाभो रत्नदीप्तो दरकमलनिधिद्योतितो हेमपीठे
ध्येयो न्यग्रोधमूले हुतभुजि विदुषा वैश्वदेवावसाने ॥

मन्त्रैरेतैर्घृतयुत-
पायसहोमोऽपि मन्त्रिणां विहितः ।

---

1. हेमाभै रत्नजालैः

लक्ष्म्यै सघृतैश्च तिलै-
बिल्वसमिद्भो मतस्तदेव फलम् ॥ ५९ ॥

भयाहारेन्दुयुक्सैव विदण्डाहस्पताक्षरा: ।
[1]बालिस्थयोनिर्नत्यन्तो वसुवर्णो मनुर्मत: ॥ ६० ॥

वर्णसाहस्रजाप्यश्च तावच्छतहुतो मत: ।
होम: सर्पिष्मतान्नेन बीजेनाङ्गक्रिया मता ॥ ६१ ॥

रत्नस्वर्णांशुकादीन्निजकरकमलाद्दक्षिणादाकिरन्तं
वासोराशौ निधायापरममरगुरुं पीतवस्त्रादिभूषम् ।
ध्यायन्नासीनमप्यापणभुवि शतसंख्यं सविंशत्कमेवं
भीतापुष्पैर्घृताक्तैस्त्रिदिनमथ हुनेत्स्वर्णवस्त्रादिसिद्धयै ॥

वययोरन्तरास्त्रं मे देहि शुक्राक्षराद्द्विठ: ।
मन्त्रोऽयुतजप: सर्पि: सहस्रहवनक्रिय: ॥ ६२ ॥

शुक्रास्ये शुक्लपुष्पैर्हुतभुजि गुणश: सप्तशोऽप्येकविंश-
द्वारं होतव्यमेषोऽप्यतिसितकुसुमालेपनो वामदोष्णा ।
वासोरत्नादिकार्तस्वरमपि सततं साधकाय प्रयच्छ-
न्ध्यातो व्याख्यानमुद्राकलितपरकरस्त्वापणालिन्दसंस्थ: ॥

1. वायुः स०

राजेरस्थोऽहिपो दण्डी वेदान्तेऽसौ विदण्डकः ।
सायान्ते नतिरप्यष्टवर्णो वैयासिको मनुः ॥ ६५ ॥

मुनिव्रातावीतं मुदितधियमम्भोदरुचिर-
द्युतिं व्याख्यामुद्राकलनविलसद्दक्षिणकरम् ।
परं जानौ कृत्वा दृढकलितकक्ष्ये कविवरं
समासीनं व्यासं स्मरत निरतं पुण्यचरितम् ॥

विकृतिसहस्रजपोऽयं
दशांशतः पायसाज्यहवनविधिः ।
निरुपमकविताप्रज्ञा-
व्याख्याश्रीसंपदावहो मन्त्रः ॥ ६७ ॥

करचरणपार्श्वमूल-
द्युलोंहरेबिन्दुदुंसरसनार्णाः ।
अलिकाद्या वर्मास्त्र-
द्विठान्तिको मनुरयं ध्रुवादिः स्यात् ॥ ६८ ॥

अयुतं प्रजपेच्च षट्सहस्रा-
वधि मन्त्रे जुहुयाद्दशांशमानम् ।

*P. II. 13

तिलसर्षपतण्डुलैः सशाली-
हविराज्यैः सुसमेधिते कृशानौ ॥ ६९ ॥

उत्तुङ्गादिः प्रचेता अपि दहनसमीरौ धराव्योमसंज्ञे
प्राक्प्रत्यग्दक्षसौम्यास्वध उपरि च दिक्षु प्रबन्धप्रभाः स्युः ।
तन्मध्यस्थान्विपक्षादिकहरिरुरुदन्तीन्द्रनागान्सचोरा-
न्हन्त्येतैर्मन्त्रिमुख्यो मनुविहितबलव्याकुलान्सद्य एव ॥

निजरिपुमचलाद्यैस्तैः ससंबाधवीतं
मनुविदथ हलोभ्यां रुद्धनिश्वासवेगे ।
तदुपरिगतबीजैः साधुसंस्यूतवक्त्रं
दहतु सकवचास्त्रद्वीन्दुभिः[1] स्वेच्छयैनम् ॥ ७१ ॥

योनिर्वियत्सुनेत्रं
परमे वर्णास्तथास्थिगं मेदः ।
रक्तस्थदृग्द्विठान्त-
स्ताराद्योऽयं मनुर्दशार्णयुतः ॥ ७२ ॥

अयुतं जपेन्मनुमिमं
सहस्रवारं हुनेत्तथाज्येन ।

1. ०बिन्दुभिः

ध्यातापि गिरिसुतेयं
जगतीं विश्वां वशीकरोत्यानिशम् ॥ ७३ ॥

अश्वारूढा कराग्रे नवकनकमयीं नेत्रयष्टिं दधाना
दक्षेऽन्येनानयन्ती स्फुरिततनुलतापाशबद्धां स्वसाध्याम् ।
देवी नित्यप्रसन्नाननशशधरबिम्बा त्रिनेत्राभिरामा
दद्यादाद्यानवद्या प्रवरसुखफलप्राप्तिहृद्यां श्रियं वः ॥ ७४ ॥

विद्ययानुदिनहृद्ययानया
होमकर्मवरहेमदायि तत् ।
कामितां सपदि वामलोचना-
मानयेदपि च मारपीडिताम् ॥ ७५ ॥

हवनक्रिया सपदि वश्यकरी
मधुरावसेकपटुना पटुना ।
सदृशो न कश्चन जगत्यपरो
मनुनामुनानयनकर्मविधौ ॥ ७६ ॥

वाणी स्यात्तारूपा शिरसि गिरिसुता शक्तिरूपा ललाटे
रव्यग्न्यक्ष्णोस्तथामौ विधुरपि वदनावेष्टने टान्तरूपः ।

श्रीर्जिह्वायां स्वरूपा स्वभिमतकरिरूपौ स्वहौ दीर्घयुक्ता-
वेवं न्यासे मुखश्रीविभवसुखयशःकान्तिमेधाकरः स्यात् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे द्वात्रिंशः पटलः ॥

त्रयस्त्रिंशः पटलः ॥

अथ संतानसंसिद्धिसमाकुलितचेतसाम् ।
तदुत्पत्तिकरं यागं प्रवक्ष्ये गृहमेधिनाम् ॥ १ ॥

न चापुत्रस्य लोकोऽस्ति पितरोऽधः पतन्ति च ।
तस्मात्तु सकलोपायैर्यतेतापत्यसिद्धये ॥ २ ॥

देवर्षिपितृपूजासु निरतानामभक्तितः ।
गुरुमातृपितृश्राद्धवञ्चकानां च नित्यशः ॥ ३ ॥

अर्थिभ्योऽर्थमदातॄणां विद्यमानेऽर्थसंचये ।
अदत्त्वैवातिथिभ्योऽन्नं भोक्तॄणां पापचेतसाम् ॥ ४ ॥

हरिशंकरयोः पादपद्मार्चाविरतात्मनाम् ।
स्वभार्यानिन्दकानां च लोकवेदविरोधिनाम् ॥ ५ ॥

इत्यादिदोषदुष्टानां पापानां [1]गृहमेधिनाम् ।
दुष्प्रतिग्रहदोषाद्वा जायते त्वनपत्यता ॥ ६ ॥

1. गृहवर्तिनाम्.

एवमादिकदोषापनोदनी सुतसिद्धिदा ।
अशेषपापहन्त्री च वक्ष्यते यजनक्रिया ॥ ७ ॥

पुत्राप्तये गृहस्थो
दीक्षाविधिना चतुर्दशीरात्रिम् ।
सह पत्न्या गमयित्वा
कृत्वा पौर्वाह्णिकीः क्रियाः सर्वाः ॥ ८ ॥

संयोज्य किंचन यथाविधि पञ्चगव्यं
संकोचकेन मनुना प्रतिमथ्य वार्णम् ।
संमन्त्र्य चाष्टशतकं समवद्यभूत-
मन्त्रैः पिबेत्स्वयमसावपि गर्भधात्री ॥ ९ ॥

ततोऽग्निमाधाय चरुं च कृत्वा
संकल्प्य तद्दक्षिणमुत्तरं च ।
भागं क्रमात्पैतृकदैविकं त-
त्पित्र्यं तु पूर्वं जुहुयात्क्रमेण ॥ १० ॥

स्मृत्वा निजं पितरमप्यधरा निषण्णं
सांनाय्य पिण्डयुगलं घृतसंप्लुतं तत् ।

हुत्वा स्रुवेण घृतसंपुटितं तथैव
मन्त्री पितामहमथ प्रपितामहं च ॥ ११ ॥

व्याहृतीभिरथ पक्वहोमतः
सर्वतः प्रतिजुहोतु सर्पिषा ।
मातृवर्गगुरुतात्पितृद्वयं
पूर्ववत्समवदिष्य साधकः ॥ १२ ॥

कलायुतैः षोडशमूर्तिमन्त्रै-
र्व्यस्तैरथाष्टाक्षरजैश्च वर्णैः ।
अष्टौ समस्तेन च तेन पञ्चा-
क्षरेण चाष्टाक्षरवज्जुहोतु ॥ १३ ॥

पक्वाहुतीनामपि वर्णसंख्यं
चतुर्गुणं चापि घृताहुतीनाम् ।
हुत्वावदानद्वितयं च पुंस्त्री-
भेदप्रभिन्नं हविषा करोतु ॥ १४ ॥

पञ्चाक्षरेण पुरुषात्मकमन्यदन्य-
वर्णेन चाष्टशतयुग्ममथ प्रजप्य ।

संयोज्य तद्युगलमप्यभिमन्त्र्य विष्णु-
 र्योन्यादिकेन मनुना च कपर्दिसंख्यम् ॥ १५ ॥

पुरुषः पुरुषात्मकं प्रकृत्या-
 त्मकमन्याथ समाहितोपयुज्य ।
अवदानयुगं क्रमान्मनस्वी
 पुनराचम्य समर्चयेद्धुताशम ॥ १६ ॥

गुरवेऽप्यथ दक्षिणां प्रदत्त्वा-
 नलमुद्वास्य च भोजयेद्द्विजातीन् ।
प्रतिपर्वकमेवमेकवृद्ध्या
 मतिमान् पकुरकं प्रपूरयीत ॥ १७ ॥

एकह्रासादन्यमब्दं द्विजाती-
 न्संभोज्यान्यं पूरयेदेकवृद्ध्या ।
संपूर्यमाणादेवमेव त्रिकाब्दा-
 दर्वाक्पुत्रो जायते दैवशक्त्या ॥ १८ ॥

पितृदेवताप्रसादा-
 न्मेधायुःकान्तिसंयुतो विद्वान् ।

लक्ष्मीतेजोयुक्तो
धर्मरुचिर्भवति संततेः कर्ता ॥ १९ ॥

समुनिसुरपितृभ्यो ब्रह्मचर्येण यज्ञै-
स्त्रिविधमृणमपत्यैश्चैव संमोचयेद्यः ।
श्रुतिवचनकृदस्मिन्वापि लोके परस्मि-
न्निति स तु गृहमेधी पूज्यते साधुलोकैः ॥

[1]वर्णादिको हलोमन्त्रः संकोचाख्यो ध्रुवादिकः ।
मन्त्रः स्याद्भूतमनवः स्युश्च भूतात्मनात्मभिः ॥ २१ ॥

अथो हिताय जगतां प्रथितं शितचेतसाम् ।
अद्य संक्षिप्य वक्ष्यामि लक्षणं गुरुशिष्ययोः ॥ २२ ॥

स्वच्छः [2]स्वच्छन्दसहितोऽतुच्छधीः सक्तहृच्छयः ।
देशकालादिविद्देशे देशे देशिक उच्यते ॥ २३ ॥

अग्रगण्यः समग्रज्ञो निग्रहानुग्रहक्षमः ।
षड्वर्गविजयव्यग्रोऽनुग्रो विगतविग्रहः ॥ २४ ॥

शुक्लशुक्लांशुकोत्कृष्टकर्मा विक्लवमानसः ।
वेदवेदाङ्गविद्वादी वेदिताविदितागमः ॥ २५ ॥

---

1. वर्गादिको; 2. स्वच्छन्दचरितो

इष्टदोऽनिष्टसंहर्ता दृष्टादृष्टसुखावहः ।
रतोऽविरतमर्चासु परं पुरमुरद्विषोः ॥ २६ ॥

शान्तो दान्तः शान्तमना नितान्तं कान्तविग्रहः ।
स्वदुःखकरणेनापि परं परसुखोद्यतः ॥ २७ ॥

ऊहापोहविदव्यग्रो लोभमोहविवर्जितः ।
अज्ञानुकम्प्यविज्ञातज्ञानो ज्ञातपरेङ्गितः ॥ २८ ॥

निरंशसांशवित्सर्वसंशयच्छिदसंशयः ।
नयविद्विनयोपेतो विनीतो न चिरात्मवान् ॥ २८ ॥

व्याधिरप्रापितव्याधिः समाधिविधिसंयुतः ।
श्रुतिधीरोऽतिधीरश्च वीरो वाक्यविशारदः ॥ ३० ॥

वर्गोपेतसमारम्भो गभीरो दम्भवर्जितः ।
आदर्श इव विद्यानां न तु दर्शनदूषकः ॥ ३१ ॥

असौ मृग्यश्च दृश्यश्च सेव्यश्चाभीष्टमिच्छता ।
शिष्यस्तदावर्जनकृद्देहेन द्रविणेन च ॥ ३२ ॥

तस्य पादारविन्दोत्थरजःपटलरूषणः ।
स्नानमप्राप्य न प्राप्यं प्रायो बुद्धिमतेप्सितम् ॥ ३३ ॥

नित्यशः कायवाक्चित्तैस्त्र्यब्दैकाब्दादिकावधि ।
परिचर्यापरः शिष्यः स्यात्सुसंयतमानसः ॥ ३४ ॥

तं तथाविधमालक्ष्य सदावितथवादिनम् ।
मातृतः पितृतः शुद्धं बुद्धिमन्तमलोलुपम् ॥ ३५ ॥

अस्तेयवृत्तिमास्तिक्ययुक्तं मुक्तिकृतोद्यमम् ।
अकल्मषं मृषाहीनमहीनद्रव्यमानसम् ॥ ३६ ॥

ब्रह्मचर्यपरं नित्यं परिचर्यापरं गुरोः ।
अल्पाशनिद्रं पूजायामनल्पकृतकल्पनम् ॥ ३७ ॥

अधीतवेदं स्वाधीनमनाधिं व्याधिवर्जितम् ।
तरुणं करुणावासं परितोषकरं गुरोः ॥ ३८ ॥

सुवेषमेषणातीतममलं विमलाशयम् ।
सुप्रसन्नं प्रसन्नाङ्गं सदा संनिहितं गुरोः ॥ ३९ ॥

परोपकारनिरतं विरतं परदूषणे ।
मातृवद्गुरुपत्नीं च भ्रातृवत्तत्सुतानपि ॥ ४० ॥

स्मरन्तमस्मराबाधं स्मितोपेतमविस्मितम् ।
परिग्रहे परीक्ष्यैव शिष्यमेवंगुणं गुरुः ॥ ४१ ॥

अलसं मलसंक्लिन्नं क्लिष्टं क्लिष्टान्ववायजम् ।
दम्भान्वितमगम्भीरं चण्डं पण्डितमानिनम् ॥ ४२ ॥

रागिणं रोगिणं भोगलालसं बालसंमतम् ।
रौद्रं दरिद्रं निद्रालुमाद्यूनं क्षुद्रचेष्टितम् ॥ ४३ ॥

नृशंसमन्धं बधिरं पङ्गुं व्यङ्गममङ्गलम् ।
अतिदीर्घमतिह्रस्वमतिस्थूलकृशात्मकम् ॥ ४४ ॥

आदित्सुं कुत्सितं वत्सं बीभत्सं मत्सरात्मकम् ।
परदारपरं भीरुं दारुणं वैरिणं सताम् ॥ ४५ ॥

लुब्धं त्वलब्धवैदग्ध्यं स्तब्धं लुब्धकबान्धवम् ।
सुखिनं मुखरं दुर्गं दुर्मुखं मूकमानसम् ॥ ४६ ॥

प्रत्यग्रमुग्रं व्यग्रेहमग्रगण्यं दुरात्मनाम् ।
प्रष्टव्यकं तमःस्पृष्टं क्लिष्टामिष्टापहं नृणाम् ॥ ४७ ॥

स्वार्थकृत्यं प्रसक्तार्थं निरर्थारम्भणं शठम् ।
ईदृग्विधं गुरुः शिष्यं न गृह्णीयात्कथंचन ॥ ४८ ॥

यदि गृह्णाति तद्दोषः प्रायो गुरुमपि स्पृशेत् ।
मन्त्रिदोषो यथा राज्ञि पत्यौ जायाकृतो यथा ॥ ४९ ॥

तथा शिष्यकृतो दोषो गुरुमेति न संशयः ।
स्नेहाद्वा लोभतो वापि यो न गृह्णाति दीक्षया ॥ ५० ॥

तस्मिन्गुरौ सशिष्ये तु देवताशाप आपतेत् ।
मधुद्विषि महादेवे मातापित्रोर्महीभृति ।
भक्तिर्या सा पदाम्भोजे कार्या निजगुरौ सदा ॥ ५१ ॥

छायाज्ञापादुकोपानद्दण्डांश्च शयनासने ।
यानं मनोगतं चान्यदन्तेवासी न लङ्घयेत् ॥ ५२ ॥

व्याख्याविवादः स्वातन्त्र्यकामिता [1]काम्यजृम्भिता ।
निद्राकुतर्कक्रोधांश्च त्यजेद्गुरुगृहे सदा ॥ ५३ ॥

अग्राम्यधर्मं विण्मूत्रसर्गनिष्ठीवनादिकम् ।
परित्यजेत्परिज्ञाता वर्मिं च गुरुमन्दिरे ॥ ५४ ॥

ग्राम्योक्तीरनृतं निन्दामृणं च वसुविक्रयम् ।
परित्यजेद्गुरौ तस्य सपत्न्यैश्च समागमम् ॥ ५५ ॥

इष्टं वानिष्टमादिष्टं गुरुणा यत्तु गुर्वपि ।
त्वरया परया कुर्याद्धिया सम्यगजिह्मया ॥ ५६ ॥

---

1. कार्यं०

कर्मणा मनसा वाचा सदा भक्तियुजा गुरुम् ।
निर्व्याजं पूजयेच्छिष्यो निजकार्यप्रसिद्धये ॥ ५७ ॥

लोकोद्वेगकरी या च या च कर्मनिकृन्तनी ।
स्थित्युच्छेदकरी या च तां गिरं नैव भाषयेत् ॥ ५८ ॥

रम्यमप्युज्ज्वलमपि मनसोऽपि समीप्सितम् ।
लोकविद्वेषणं वेषं न गृह्णीयात्कदाचन ॥ ५९ ॥

इत्याचारपरः सम्यगाचार्यं यः समर्चयेत् ।
कृतकृत्यः स वै शिष्यः परत्रेह च नन्दति ॥ ६० ॥

देवानृषीनपि पितॄनतिथींस्तथाग्निं
नित्योद्यतेन मनसा दिनशोऽर्चयेद्यः ।
इष्टानवाप्य सकलानिह भोगजाता-
न्प्रेत्य प्रयाति परमं पदमादिपुंसः ॥ ६१ ॥

इत्थं मूलप्रकृत्यक्षरविकृतिलिपिव्रातजातग्रहर्क्ष-
क्षेत्राद्याबद्धभूतेन्द्रियगुणरविचन्द्राग्निसंप्रोतरूपैः ।
मन्त्रैस्तद्देवताभिर्मुनिभिरपि जपध्यानहोमार्चनाभि-
स्तन्त्रेऽस्मिन्यन्त्रभेदैरपि कमलज ते दर्शितोऽयं प्रपञ्चः ॥

यदाश्रया विप्रकृतिप्रभावतो
विभिन्नतारांशसमुत्थितौजसः ।
जगन्ति पुष्णन्ति रवीन्दुवह्नयो
नमोऽस्तु तस्मै परिपूर्णतेजसे ॥ ६३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे त्रयस्त्रिंशः पटलः ॥

प्रपञ्चसारः संपूर्णः ॥

श्लोकानुक्रमणिका

॥ श्रीः ॥

॥ श्लोकानुक्रमणिका ॥